अथ यद्याहिताग्नेर्दैवान्मानुषादापराधात् स्वयमजुह्वतः संवत्सरोऽतीयात् अतिप्लुतयोजनमध्वातिक्रमो वा भवेत् भार्य्यारजसि सूतकमृतकयोर्वा प्रवास[ः]स्या[त्]द्विषदन्नस्य द्विषतो वा प्राशनं भवेत् पर्व्वण्युपस्थानलोपे भार्य्यागमने च संततपञ्चत्रयहोमे होमविच्छेदे वृषभखोष्ट्रयुक्तयाने दिवा स्वभार्य्यागमने सूर्य्योदयास्तमयस्वापे मनोज्ञस्वप्रदर्शने सुरासवगन्धाघ्राणे पतितान्न-जग्धिप्रतिग्रहयोश्च अन्यान्युपपातकान्युक्तानि तेषु तेषु पवित्रेष्टिप्रायश्चित्तिरिति। अन्यान्यपि निमित्तान्युक्तानि बौधायनीयधर्म्मसूत्रे

... ...।

9A. अथातः पवित्रेष्टिं व्याख्यास्यामः।

Pavittresti ends in 13B. Both these are expiatory rites.

III

अथ भारद्वाजीयपरिभाषासूत्रोक्तो पवित्रेष्ट्यतिपवित्रेष्टिः। पवित्रेष्टिं व्याख्यास्यामः।

अमावास्यायां पौर्णमास्यां वा अग्नीन् अन्वाधाय वैश्वदेववद्विधावर्हिराहरति प्रणीताः प्रणीय चतुर्गृहीतं जुहोति। येन देवाः पवित्रेणेति परं चतुर्गृहीतं प्राजापत्यं पवित्रमिति अपरं चतुर्गृहीतमिन्द्रः सुनीतीति अभ्यातानान् हुत्वा आग्नेयमष्टाकपालं

निरूप्य पवमानहवींषि वैश्वानरं द्वादशकपालं पञ्चममाग्नेयं परि-
हाप्य अग्नये व्रतपतये इत्येके समामनन्ति ।

This comes to an end in 14B and next we have:—

IV.

अथ बौधायनसूत्रोक्ता पवित्रेष्टिः अथो एतत् सोपरिमितं
प्रवसतिनसंवत्सरमतिप्रवसतीत्येवेदमुक्तं भवतीत्यादि ।

This goes to the end of the MS.

346.

3304.

Substance, country-made paper $10\frac{1}{2} \times 5$ inches Folia, 7 Lines, 15, 16 on a page Extent in ślokas, 300 Character, Nāgara of the eighteenth century Appearance, discoloured

I. मृगारेष्टिविनिर्णयः,

By Anantadeva, son of Āpadeva.

Beginning:—श्रीकृष्णं प्रणतार्त्तिघ्नं आपदेवाभिधं गुरुम् ।

· *End*:—4B, अवादीत्यमनन्तेन मृगारेष्टेर्विनिर्णयः ।

II पवित्रेष्टि

By the same author

Beginning:—4B. तत्र निमित्तानि मैत्रायणीयपरिशिष्टे ।

Colophon:—अवादीत्यमनन्तेन पवित्रेष्टिविनिर्णयः । श्रीः ।

347.

757 **आश्वलायनीयप्रायश्चित्त ।** *Āśvalāyanīya Prāyaścitta.*

By Ananta Deva.

For the manuscript see L. 1576.

A fragment of Ananta Deva's comprehensive work on expiations. The fragment under notice relates to prāya-ścittas for errors and accidents with reference to fire in yajña.

It ends with Agnyupodghāta prāyascitta.

The verse in 10B gives the author's name and its contents:—

आश्वलायनमुन्युक्तमग्निगोचरमीरितम् ।
प्रायश्चित्तमनन्तेन तेन तुष्यतु यज्ञभुक् ॥

After this there are three lines more dealing with the same subject. It ends प्रपश्चितमिति दिक्. The authorities quoted:—

Devatrāta, Siddhānta bhāsya, Sāyanācarya, Trikāṇḍa-maṇḍana, Prāyascittanidhi of the author's grandfather, Vrttikrt (the Vrttikrt here is the author of the Vrtti on Āsvalāyana Sūttrās), Rudra Datta

4B. इत्युद्धरणप्रायश्चित्तम्, 5B. कालातिपत्तिप्रायश्चित्तम्, 6B. वह्निःपात-प्रायश्चित्तम्, 7A. व्यवायप्रायश्चित्तम्, 10B. इत्युपोद्घात प्रायश्चित्तम् ।

348.

10309. *The Same*

By Anantadeva.

Subtance, country-made paper 8×4 inches Folia, 19 Lines, 9 on a page. Extent in Slokas, 300 Character, Nāgara Date Sam. 1869 Appearance, fresh Complete

Colophon:—इत्यग्न्युपोद्घातप्रायश्चित्तानि आश्वलायन ॥

श्रीरस्तु ॥ श्रीकृष्ण ॥ [आश्वलायन]मुन्युक्तमग्निगोचरमीरितम् ।
प्रायश्चित्तमनन्तेन तेन तुष्यतु यज्ञभुक् ॥
इत्यापदेवसुतश्रौताग्निसम्बद्धप्रायश्चित्तानि ॥

Post Col.:—(After quotations from Rāmāṇḍāra and Prayascittapradīpa) सं १८६९ शाके १७३४ माघ कृष्ण ११ ।

Beg.:—श्रीगणेशाय नमः । etc

अथ आश्वलायनीयाग्न्यनुगमनप्रायश्चित्तानि । आहवनीये विद्य-
माने यदि गार्हपत्योऽनुगच्छेत् अवस्ता[मि]भ्यो मंथनं कृत्वा आहव-

नीयोनुगमयितव्यः । समानयोनित्वे दक्षिणोऽप्येवमेव ॥ क्षामाभावे भस्मना अरणीं संस्पृश्य मन्थयेत् । etc., etc.

The beginning is the same as quoted in L. 1576.

349.

3211. **अग्निहोत्रविधि ।** *Agnihotravidhi.*

By Anantadeva.

Substance, country-made paper. 8×4 inches Folia, 8. Lines, 13 on a page Extent in ślokas, 208. Character, Nāgara of the eighteenth century. Appearance, discoloured Complete.

It begins:—

अथाग्निहोत्रं ॥ आधानानन्तरं द्वादश+नमध्ये पूर्णमाससोमारम्भाप्रसक्तौ द्वादशदिनपर्यन्तमजस्रेष्वेव तत् कार्य्यम् । तत्रोद्धरणकाले अग्न्युत्पत्तिक्रमेण प्रादुष्करणं कार्य्यं कालातिक्रमे सर्व्वप्रायश्चित्तम् । त्रयोदशेऽह्नि प्रातर्होमान्तेऽग्नित्यागः । ततः सायंकालप्रभृतिहोमार्थमुद्धरणं कार्य्यम् ।

It ends:—

इत्यग्निहोत्रविधयोऽनन्तदेवेन कीर्त्तिताः ।
सुधियां प्रीतये प्रीतस्तया स्यात् प्रेरको धियाम् ॥

350.

2998. **पौनराधेयी** or **पुनराधेयसंग्रहः ।** *Paunaradheyī or Punarādheya saṃgraha.*

By Rudradeva.

Substance, country-made paper 10×4¾ inches Folia, 8 Lines, 11 on a page Extent in ślokas, 225. Character, Nāgara of the early nineteenth century. Appearance, discoloured Complete

It relates to the method of rekindling the sacred fire extinguished on any account and belongs to the school of Āśvalāyana.

The māngalācaraṇa and the object of the work.

आश्वलायनमानस्य देवस्वाम्यादिभिः सह ।
विदुषा रुद्रदेवेन पुनराधेयसंग्रहः ॥
तत्र भरद्वाजः पुनराधेयं व्याख्यास्यामस्तस्याग्न्याधेयेन कल्पो व्याख्यातः । इत्यादि ।

Colophon :—

इति श्रीरुद्रदेवविनिर्म्मितिः पौनराधेयी समाप्ता ।

The Post Colophon Statement :—

इदं पुस्तकं महादेवज्येष्ठापत्यस्य रामचन्द्रदेवस्य ॥
प्रति शारदानंददीक्षिता चेदरीजागजे ॥ शिवम् । शंभुः ॥

The authorities consulted :

1A. भरद्वाज, आश्वरथ्य, आपस्तम्ब, 1B, भाष्यकृत्, रुद्रट, कात्यायन, लौगाक्षि, मानवसूत्र, वराहसूत्र, कारिका वृत्तिकृत्, 2A, स्मृतिचन्द्रिका, बौधायन, यज्ञतन्त्र, रुद्रदत्त, सत्याषाढ़, कात्यायनपरिशिष्ट, 3A, देवजाग्निभाष्य, रामाण्डार-भाष्य, त्रिकाण्डमण्डन ।

351.

2999. आश्वलायनप्रायश्चित्तप्रयोगः ।

By Mohla Tryambaka

It is based on the author's comm. on Āśvalāyana, Chap. III.

For the manuscript and the work see L. 1030

The Post Colophon Statement —

इदं पुस्तकं महादेवदेवसुतरामचन्द्रदेवेन लिखापितं स्वार्थं परार्थं च ।

352.

2989. अपत्नीकाधाननिर्णयः । *Apatnīkādhānanirṇaya*

By Govinda Dīkṣita

Substance, country-made paper 10 × 4½ Leaves, 17, of which the fifth is missing. Lines on a page, 8 Extent in ślokas, 374 Character, Nāgara

Date, Śaka 1736. Appearance, discoloured, pasted all over with transparent paper Complete

The work, entitled मध्वदपत्नीकाधाननिर्णय, comes to an end in line 3, p 11*a*.

Col. :—इति श्रीमच्चातुर्धरकुलावतंसगोविन्ददीक्षितविरचितो मध्वदपत्नीकाधाननिर्णयः ।

For the work see L 1424, p. 41, Vol. IV, as well as the fourth work in L4141, p. 253, Vol X.

2 In leaf 15*b*, line 3 इति श्रीसकलविद्वदर्थचातुर्धरोपनामकनीलकण्ठतनुजेन गोविन्देन कृतो लघ्वपत्नीकाधाननिर्णयः ।

3. In leaf 16*b* इति श्रीचातुर्धरगोविन्दधरदीक्षितेन विरचितो लघुतरापत्नीकाधाननिर्णयः । For which see the fifth work in L. 418.

Post Col —रुद्रलग्नाद्रिचला शाके तैषे शुक्लेऽम्बिकातिथौ ।
विद्याधरात्मजो रामोऽलिखत् काश्यां शिवालये ।
जानकीजानिः प्रसन्नो ॥ हेरम्बपधति हृदये वेगाल्लेखनी भ्रान्तिभावा ।

After this are given a few verses in which the contents of the Āpastamba Sūtras are detailed chapter by chapter, at the end of which there is a short discussion as to whether the Bharadvāja Pitṛmedhasūtra is complete in one chapter or two.

353.

573 *The Same.*

For the manuscript see L 1424.

The colophon given in L. 1424 is not to be found anywhere in the body of the manuscript. It occurs in a different hand on the back of the last leaf of the manuscript. In the first line of the leaf 19B ends अपत्नीकाधाननिर्णयः । Then there are 6 lines of अपत्नीकाग्निहोत्रं which breaks off abruptly. The following leaf marked 20 is blank, on the back of which occurs the colophon.

354.

3000.

For the manuscript and the work see L. 4141.

In L. 4141 the work is described under the name of Apatnīkādhānanirṇaya But it contains disquisitions by Govinda Caturdhara, on a number of Śrauta rites and ceremonies, and the last of the topics treated of is Apatnīkā dhānanirṇaya

4B. इति चातुर्धर गोविन्ददीक्षितीयोऽग्नीषोमीयविचारः, 7A. इति चातुर्धरकुलावतंस—श्रीनीलकण्ठात्मज--गोविन्ददीक्षितकृतोऽग्नीषोमीयपुरोडाश—विचारः; 7B. गोविन्ददीक्षितकृताग्नीषोमीयसंग्रहकारिकाः (The number of kārikās—8); 9A, इति श्रीमत् चतुर्धरगोविन्ददीक्षितरचित उदिताधानविषयः समाप्तः, 9B, अथापत्नीकस्य कस्याधानेऽधिकारोऽस्ति कस्य नास्तीति विविच्यते; 21A, इति श्रीमच्चातुर्धरकुलावतंस-गोविन्ददीक्षित-विरचितो मद्दद-पत्नीकाधाननिर्णयः; 27A, इति श्रीमत् सकलविद्वद्वर्य्य-चातुर्धरोपनामक-नीलकण्ठतनूजेन गोविन्देन कृतो लघ्वपत्नीकाधाननिर्णयः, 28B (The last Colophon) श्रीचातुर्धरगोविन्ददीक्षितीयो लघुतरापत्नीकाधाननिर्णयः।

355.

260. **अग्न्याधानपद्धतिः।** *Agnyādhānapaddhati.*

For the MS. see L. 1416.

It belongs to the Āsvalāyana School of the Ṛgveda.

23B. Line 4 इत्यन्वारम्भनीयेष्टिं।

22A. Line 2 इति आश्वलायन-अग्निहोत्रहोमः।

In leaf 23B, Line 3, begins a different hand, which goes to the end of the MS. and treats of Āgrayaṇas

356.

3128 आश्वलायनाग्निहोत्रहोमः ।

Āśvalāyanāgnihotrahoma

Substance, country-made paper $6\frac{3}{4} \times 3\frac{1}{2}$ inches Folia, 6 Lines, 9 on a page Extent in ślokas, 100 Character, Nāgara of the eighteenth century Appearance, discoloured Complete

It begins:—

देवं त्वा देवेभ्यः श्रिया उद्धरामि इत्युद्धरेत् । उद्ध्रियमाण उद्धर पाप्मनो मा यदविद्वान्यच्च विद्वांश्चकार राज्या यदेनः कृतमस्ति किञ्चित् सर्व्वस्मान्मोद्धृतः पाहि तस्मात् । इति प्रातः । ... ... इति सायं प्रणयेत् । ... ... इत्युद्धरणम् । अथ आचमनं कुर्य्यात् ।

The Saṃkalpa runs:—

1A. पूर्व्वोच्चरित एवंगुणविशिष्टायां शुभपुण्यतिथौ ममोपात्तदुरितक्षय-द्वारा श्रीपरमेश्वरप्रीत्यर्थं सायमग्निहोत्रहोमं पयसा होष्यामि प्रातरग्निहोत्रहोमं पयसा होष्यामि ।

Colophon:—इत्याश्वलायनाग्निहोत्रहोमः समाप्तः ।

357.

2134. आश्वलायनोक्तसायंप्रातरग्निहोत्रहोमः ।

Āśvalāyanokta-Sāyamprātaragnihotra-homa.

Substance, country-made paper $9\frac{1}{4} \times 4\frac{1}{4}$ inches Folia, 5 Lines, 11 on a page Extent in ślokas, 100 Character Nāgara of the eighteenth century Appearance, discoloured

It begins:—

आश्वलायनोक्तसायंप्रातरग्निहोत्रहोमो लिख्यते । आचम्य प्राणा-नायम्य तीर्थेन प्रविश्य उद्धरणपक्षे उत्सर्गेऽपराह्णे गार्हपत्यं प्रज्वाल्य दक्षिणाग्निं तुष्णीमानीय गार्हपत्यादाहवनीयं ज्वलन्तमुद्धरेत् । 'देवं त्वा देवेभ्यः श्रिया उद्धरामि' इत्युद्धरेत् । उद्ध्रियमाणः उद्धर पाप्मनो मा यदविद्वान् यच्च विद्वांश्चकार अह्ना यदेनः कृत-मस्ति किञ्चित् । सर्व्वस्मान् मोद्धृतः पाहि तस्मात् । इत्याहवनीयं

प्रतिनीत्वा पश्चिमाभिमुखः उपविश्य अमृताहुतिरमृतायां जुहो-
म्यग्निं पृथिव्यां अमृतस्य योनौ। तयानन्तं काममहं जयानि प्रजा-
पतिः प्रथमोऽयं जिगायाग्नावग्निः स्वाहा। इति निदध्यात्।

It ends:—

भूर्भुवस्वरोम् सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहा। सूर्यायेदम्०।
उन्मृज्य ० सत्यर्त्ताभ्यां त्वे इत्याद्यन्यत् सर्वं समानम्।

अनेन प्रातरग्निहोत्रहोमाख्येन कर्म्मणाऽग्निरूपी परमेश्वरः
प्रीयताम्।

It is meant for the use of those who keep up the holy fire.

358.

2340. **दर्शपौर्णमासप्रयोगः।** *Darśa-Paurṇamāsa-Prayoga.*

Substance, country made paper 9×3½ Folia, 21 Lines on a page, 9, 10 Extent in Ślokas, 550 Character, Nāgara of the early eighteenth century Appearance, fresh Complete

20B. अनेन यथाज्ञानेन पौर्णमासे कृते श्रीयज्ञनारायणः प्रीयतां न मम।
ॐ तत्सद् ब्रह्मार्पणमस्तु। श्रीगणेशाय नमः। अथ दर्शेष्टिः
लिख्यते।

Col.—21B. इति दर्शेष्टिः समाप्तिः।

Post Col.—इति दर्शपौर्णमासौ लिख्यतौ। गोपालभटे खण्डालकरेण
लिखितौ समाप्तौ आत्मार्थं परोपकारार्थं च समाप्तम्। भग्नपृष्ठ-
कोटिग्रीव।

etc.

It begins.—ॐ अद्य पूर्व्वो ० शुभपुण्य ० ॐतत्सत् परमेश्वरप्रीत्यर्थं दर्श-
पौर्णमासाभ्यामहं यक्ष्ये। तत्र पौर्णमासेष्ट्याहं यक्ष्ये संकल्प्योद्धरणं
पञ्चभूसंस्कारा दर्भैः परिसमुह्य गोमयेनोपलिप्य वज्रेण उल्लिख्य
अनामिकाङ्गुष्ठेन उद्धृत्य उदकेन अभ्युक्ष्य अग्निमुपसमाधाय आहव-
नीयोद्धरणं ततो दक्षिणाग्न्युद्धरणं षट् समिधो गृहीत्वा अग्नि
[अ]न्वाधानमध्वर्युर्य[ज]मानो वा अग्निं अष्टाकपालेन पुरोडाशेन

अग्नीषोमावन्ते आ(रा)ज्येन उपांशु अग्नीषोमावेकादशकपालेन पुरोडाशेन सद्योहं यक्ष्ये ।

359

2020. **कौकिलसौत्रामणीविधिः ।** *Kaukilasauttrā-maṇī-vidhi*

According to Āśvalāyana.

For the manuscript and the work see L. 4246.

360.

2328. **पिण्डपितृयज्ञप्रयोगः ।** *Piṇḍapitṛyajñaprayoga*

From Āśvalāyana Kalpasūtra.

Substance, country-made paper $8\frac{1}{4} \times 4$ inches. Folia, 3 Lines, 10 on a page. Extent in slokas, 60. Character, Nāgara of the eighteenth century Appearance, discoloured Complete

It begins :—अथ पिण्डपितृयज्ञः । प्रागुत्पत्यपरिग्रहात् ।

आमावास्यायामथापराह्णे यजमानः पिण्डपितृयज्ञेन चरन्ति । वैश्वदेवानन्तरं दर्शश्राद्धात् पूर्वं शुचिराचम्य तीर्थेन प्रविश्याऽन्वा-हार्यपचनस्य पश्चात् प्रागदक्षिणामुख उपविश्य प्राणानायम्य तीर्थादि संकीर्त्य पितृदृष्टिद्वारा श्रीपरमेश्वरप्रीत्यर्थं पिण्डपितृयज्ञं करिष्ये इति संकल्प्य ।

"दक्षिणाग्नेरेकोल्मुकं प्राग् दक्षिणा प्रणयेत् । ये रूपाणि प्रति-मुञ्चमाना असुरा सन्तः स्वधया चरन्ति । परापुरो निपुरो ये भरन्त्यग्निष्टाल्लोकात् प्रणुदात्वस्मात् ।"

It ends :—मध्यमं पिण्डमाददीतधीवं मेदत्त पितरः तं पत्नीं प्राशयेत् । इति तस्या भक्षणमन्त्रः । इतरावप्स्विति प्रणीते क्षिपेत् । द्विवत्-पात्रामुत्सर्गस्त्वां द्वितीय मुद्रिक्ते । संतिष्ठते पिण्डपितृयज्ञः ।

This short manual on a ceremony for the propitiation of the manes is based on Āśvalāyana Kalpasūtra, 7th section of the 2nd chapter.

This is enjoined on Brāhmaṇas keeping up the sacred fires. It quotes the Sūtras in the regular order, of Āsvalāyana.

361.

730.

For the manuscript see L 1552

This is a fragment of a comprehensive work on the Srautasūttra Prāyascitta

It quotes from Hiranyakesisūttra, 2B; Vrttikāra, 4A; as well as from Kātyāyana as quoted in Parāsaramādhava, 7B.

Both Rājendralāla and Aufrecht give the name of the work as Ādhānaprāyascitta, which is only a sectional colophon.

Two sectional colophons may be mentioned here.

21B. इत्याश्वलायनीयविच्छ्यपराधप्रयोगः समाप्तः ।

22B. इत्याधानप्रायश्चित्तम् ।

362.

2958. **प्रयोगरत्नम्** or **श्रौतप्रयोगरत्नम्** । *Prayogaratna or Srauta Prayogaratna.*

By Narasiṉha Yajvan.

Substance, county-made paper. 9½ × 4 inches Folia, 26, of which 17-22 are missing Lines, 11 to 13 on a page Extent in slokas, 780 Character, Nāgara Date, Samvat 1780 Appearance, discoloured. Complete

It is a very rare and useful work in kārikā form, on the Srauta rites, belonging to the school of Āsvalāyana.

It begins :—

प्रणमामि गणाधीशं विघ्नध्वान्तदिवाकरम् ।

दंतावलमुखं सांद्रं सिन्दूरारुणविग्रहम् ॥

... ... २ ॥

Īśvara Bhāratī is the author's guru.

मीमांसायुगलव्याख्यानिपुणं श्रौतकर्म्मणाम् ।
विज्ञातारं गुरुं नौमि यतिमीश्वरभारतीम् ॥ ३ ॥

The object of the work.

प्रणम्य पञ्चाननवाहनामुमां
ऋषिं तथा शौनकमाश्वलायनम् ।
करोति तत्सूत्रविबोधितार्थं
प्रयोगरत्नं नरसिंहयज्वा ॥ ४ ॥

In 16B. he gives the name of his elder brother as Gopīnātha Bhaṭṭa

गोपीनाथबुधानुजभट्ट-श्रीमन्नृसिंहविरचितेऽस्मिन् ।
श्रौतप्रयोगरत्ने यजमानस्य प्रवासविधिरुक्तः ॥

8A. इति श्रीमन्नरसिंहयज्वकृते प्रयोगरत्ने दर्शपौर्णमासहौत्रकारिकाः (The number of Kārikās 194); 11B, इति ब्रह्मत्वकारिका (88); 12B, इत्यग्न्याधेयकारिकाः (23); 15B, इत्यग्निहोत्रकारिकाः समाप्ताः (83); 16B, इति प्रवासोपस्थानकारिकाः (25); 23B, इति वत्सप्रवासकारिकाः (27); 25B, इति पित्रेष्टिकारिकाः (60); इति शाकमेधेष्टिकारिकाः (Two Kārikās only). 26B, इति श्रीनृसिंहयज्वकृताचातुर्म्मास्येष्टि-कारिकाः समाप्ताः ।

The Post Colophon Statement:—

संवत् १७८० पौषकृष्णत्रयोदश्यां शनौ खोड़ोपनाम्ना विश्वेश्वरेण
लिखितमिदं पुस्तकं स्वार्थं परार्थं च ॥ शुभमस्तु सर्व्वजगतः ॥ श्री ॥

363.

3122. **महारुद्रविधान ।** *Mahārudravidhāna.*

Intended for the followers of the Ṛgveda.

By Dvivedācala.

Substance, country-made paper $10\frac{1}{2} \times 4\frac{1}{4}$ inches. Folia, 41. Lines, 10 on a page. Extent in ślokas, 820. Character, Nāgara of the eighteenth century.

The māngalācaraṇa and the object of the work.

नत्वा गणेशन्तु सरस्वतीं च
तथाम्बिकां सगणं पञ्चवक्त्रम् ।
धर्म्मप्रदं काम्यविधौ प्रधानं
वक्ष्ये महारुद्रभवं विधानम् ॥

Definition of Mahārudra.

एकत्रिंशता साकं च सहस्रं त्रिशताधिकम् ।
रुद्रजपानां संख्येषा महारुद्राभिधायिनी ॥

It ends:—

इदं विश्वजनीनेनाचलेनेशानतुष्टये ।
महारुद्रविधानं हि विस्तरेण समीरितम् ॥ १ ॥
द्विजैरिदं हृत्कमले निधीयतां
शिवार्चनानेन सदा विधीयताम् ।
शिवार्चनायास्तु फलं प्रगृह्यतां
फलोपभोगेन सदा सुखीयताम् ॥ २ ॥
द्विवेदी विदुषां प्रधानमभवत् श्रीवत्सराजो द्विज-
स्तत्सूनुः सकलद्विजाङ्घ्रिरजसामंशी तृतीयोऽचलः ।
तेनेदं रचितं हि पूजनपरं रुद्रस्य सन्तुष्टिदं
यत्कृत्वा सजपं जनोऽभिलषितं प्राप्नोति सर्व्वं महत् ॥

Colophon:—इति श्रीद्विवेदाचलविरचितमृग्वेदिनां महारुद्रविधानं समाप्तम् ।

Post Colophon:—इति श्रीरुद्रार्पणमस्तु । श्रीमद्विश्वेशसन्निधौ काश्यां सुफलासुतरघुनाथेन लिखितमिदं पुस्तकं श्रीभवानीशङ्करप्रसादात् ॥

364.

2683. **आश्वलायनगृह्यकारिका ।** *Āśvalāyana-Gṛhyakārikā.*

By Kumārila Svāmī.

Substance, country-made paper. 9⅓ × 5¼ inches. Folia, 46. Lines, 8 on a page. Extent in ślokas, 700. Character, Nāgara. Date, Samvat 1889. Appearance, fresh. Complete.

The last colophon wrongly calls the author Kumāri-tilaka.

इति भट्टकुमारितिलकस्वामिविरचितासु कारिकासु चतुर्थोऽध्यायः ।

For an excellent description of the work see Burnell 14A.

Post Col. :—संवत् १८८६ मिति श्रावणवद्य १ सौम्यवासरे समाप्तम् ।

With the MS. there is kept a stray leaf marked 15, and written in beautiful, bold Devanāgarı.

365.

270. प्रयोगरत्न । *Prayogaratna.*

By Nārāyaṇa Bhaṭṭa, the son of Rāmēsvara Bhaṭṭa.

Substance, country-made paper 10×4 inches Folia, 119 Lines, 12 on a page. Extent in ślokas, 3570 Character, Nāgara Date, Śaka 1762 Ap pearance, tolerable Generally correct Incomplete at the end.

For a complete work see L. 1465

The present MS. ends with Asṭakāvikrtiśrāddhaprayoga.

Post Colophon Statement :—

आर्य्यादुर्गार्पणमस्तु । श्रीगुरुचरणारविन्दं प्रसन्नम् । शाके १७६२ शार्वरीनामसंवत्सरे कार्त्तिकशुक्लाषष्ठ्यां शनौ इदं पुस्तकं गुर्ज्जरोपनाम्ना विश्वम्भरात्मज-रामचन्द्रोपाध्यायेन लिखितं स्वार्थं परार्थं च ॥ श्रीरस्तु । शुभं भवतु श्रीर्जयतु ।

366.

639. *The Same.*

For the manuscript see L 1465.

There are two works by the same author (I) Prayoga ratna complete in 148 leaves and (II) Aurddhvadehikapad-dhati complete in 44 leaves.

The Post Colophon Statement:—

त्रिपुष्करमरणे दानं स्मृतिसंग्रहे पत्रे १९३ माद्या संवत् १७४१ भावनामसंवत्सरे माघशुद्धपञ्चम्यायां तद्दिने समाप्तं विजापूरगोपृष्टी रुद्रभट्टलिखितम् ।

मृता गर्भयुता नारी षण्मासाभ्यन्तरे यदि ।
सद्दैव दहनं कुर्यात् गर्भच्छेदं न कारयेत् ॥

367.

1648. *The Same*

Substance, country-made yellow paper 10½×4¼. Folia 96 Lines ... on a page Extent in Ślokas 3800. Character, Nāgara Date (-) Appearance fresh Generally correct

It ends with the chapter on 'Astakāvikrti Śrādha Prayôga.'

The obverse of the first leaf contains a full index of the subjects treated of in Prayogaratna which is given here in full.

अथ नारायणभट्टकृत-प्रयोगरत्नप्रारम्भः पत्र ९६ ।

अथ सूचिकाप्रारम्भः ।

368.

2194. *The Same.*

Substance, country-made paper $9\frac{1}{2} \times 3\frac{1}{2}$ inches Folia, 230 Lines, 7 on a page Extent in slokas, 1600 Character, Nāgara of the seventeenth century Appearance, discoloured Incomplete

It begins :—श्रीरामं सपरिवारं गणेशं च सरस्वतीम् ।
आश्वलायनं च तच्छिष्यान् प्रणम्य पितरं गुरुम् ॥
भट्टरामेश्वरसुतो भट्टनारायणः सुधीः ।
प्रयोगरत्नं कुरुते काश्यां शिवेष्टतुष्टये ।
ग्रन्थेऽस्मिन् गुणगणवत्त्वमुच्यते चेत्
स्वग्रन्थं गुणगणवन्तमाह को नः ।
तत् सन्तः शिरसि कृताञ्जलिस्तु याचे
शोध्यं तत् सदसदिहोच्यते मया यत् ॥
नमामि पार्व्वतीसूनुं भक्तानां सिद्धिदायकम् ।
क्रियते ह्युपकारार्थं स्मार्त्तानुष्ठानपद्धतिः ॥
आश्वलायनशास्त्रेऽस्मिन् सन्ति पद्धतयः शतम् ।
विनापुस्तकमार्गेण कर्म्म कर्त्तुं न शक्यते ॥
तदर्थं क्रियते यत्नः पाठबोधहिताय च ।
सुलभोपायसिद्ध्यर्थं वैदिकानां तदुच्यते ॥
पञ्चविंशतिसंस्कारैः संस्कृता ये द्विजातयः ।
ते पवित्राश्च योग्याः स्युः श्राद्धादिषु सुयन्त्रिताः ॥
गर्भाधानं पुंसवनं सीमन्तो बलिरेव च । (बलिर्विष्णुबलिः)
जातकृत्यं नामकर्म्म निष्क्रमोऽन्नाशनं परम् ॥
चौलकर्म्मोपनयनं व्रतानां च चतुष्टयम् ।
स्नानोद्वाहौ चाग्रयणमष्टका च यथातथम् ॥

श्रावण्यामाश्वयुज्यां च मार्गशीर्ष्यां च पार्व्वणम् ।
उत्सर्गश्चाप्युपाकर्म्म महायज्ञाश्च नित्यशः ॥
संस्कारा नियता ह्येते ब्राह्मणस्य विशेषतः ।
अथ स्वस्तिवाचनम् ॥

Bhaṭṭa Nārāyaṇa's Prayogaratna is well known. See I.O. Catal. No 471. Topics treated of are:—

26A, इति नान्दीश्राद्धप्रयोगः ; 44A, इति संक्षेपेण प्रायश्चित्तम् ; 49B, अथ गर्भाधानाद्याः संस्कारा वक्ष्यन्ते ; 91B, इति गर्भाधानम् ; 96B, इति पुंसवननावलोभनसीमन्तोन्नयनकर्म्माणि समाप्तानि , 104B, इति विष्णुबलिप्रयोग , 107A, इति जातकर्म्म ; 114B, इति नामकरणम् ; इति पर्य्यङ्कारोपणम् , 115B, इति कर्णवेधः ; 118A, इति संक्षेपेण निष्क्रमणप्रयोगः ; 119B, इति संक्षेपेणोपवेशनान्नप्राशन प्रयोगः ; 121A, इति संक्षेपेण वर्द्धापनविधिः ; 126B, इति चौलकर्म्मप्रयोगः , 139A, इत्याचौलान्मेधाजननान्तं संक्षेपेण प्रयोगः , 154B, इत्युत्सर्ज्जनोपाकरणप्रयोगः , 161A, इति संक्षेपेण महानाम्नीव्रत प्रयोगः ; 162A, इति महाव्रतप्रयोगः, अथ उपनिषद्व्रत प्रयोगः ; 162B, इति महानाम्नयादि व्रतत्रयं समाप्तम् , 164B, इति गोदानव्रतम् ; 171B, इति समावर्त्तनप्रयोगः ; 192B, इति कन्यादानप्रयोगः ; 199A, इति वधूगृहगमनविधिः , 209A, इत्यग्निद्वयसंसर्गप्रयोगः ; 214B, इति प्रवासोपस्थानविधिः ।

The MS breaks off abruptly while dealing with the discontinuation of the sacrificial fire

From a comparison with I.O. Catal. No. 471, it will be found to be a revised edition of Bhattanārāyana's Prayogaratna. It omits the chapter on obsequies of Bhatta Nārāyaṇa's work and adds a new chapter on expiations

On the title-page it is called अनन्तभट्टी प्रयोगः and the following leaves bear the name of Ananta on the left-hand margin :—

76B, श्रीअनन्त , 88B, अनन्तभट्टी ; 113B, अनन्तभट्टी ; 140B, अनं , 144A and B, अनन्तभट्टी; 175B, अनन्तभट्टी; 178AB, and

179B, अनन्तभट्टी, 182B, अनन्तभट्टी, 183B, अंत, 193A, अनन्तभट्टी ; 195BA, अनन्तभट्टी ; 204B, अनन्तभट्टी ; 223A, अनन्तभट्टी ।

So evidently the additions and alterations were made by Ananta Bhaṭṭa.

369.

2702. *The Same.*

Substance, country-made paper 10×4 inches. Folia, 29, of which foll 10-13 are missing. Lines, 7 on a page Extent in Ślokas, 400 Character, Nāgara in a remarkably beautiful hand of the eighteenth century Appearance, discoloured.

The present manuscript contains the concluding portion, dealing with seven pākayajñas or sacrifices in which cooked rice is offered.

The māngalācaraṇa and object of the present section of the work :—

आश्वलायनमाचार्य्यं प्रणम्य पितरं गुरुम् ।
भट्टरामेश्वरसुतो भट्टनारायणः सुधीः ॥
पञ्चविंशतिसंस्कारेषूक्ताष्टादशसंस्कृतीः ।
पाकयज्ञान् सप्त शिष्टान् वक्ति शिष्टेष्टतुष्टये ॥

Colophons :—

6A, इति श्रीरामेश्वरभट्टात्मज-नारायणभट्टविरचिते प्रयोगरत्ने श्रवणाकर्म्मप्रयोगः ।

8A, इति श्रीनारायणभट्टविरचिते प्रयोगरत्ने सर्पबलिप्रयोगः ।

9A, ० आश्वयुजीकर्म्मप्रयोगः ।

अथाग्रयणप्रयोगः । Colophon lost in the missing leaves.

19B, ० पिण्डपितृयज्ञप्रयोगः ।

24B, इत्यष्टमीश्राद्धप्रयोगः ।

29A, अन्वष्टका(क्य)प्रयोगः ।

29B, अष्टकाविकृतिश्राद्धप्रयोगः ।

370.

3300. *The Same.*

Substance, country-made paper. 9¼×4 inches Folia, 210. Lines, 8 on a page Character, Nāgara of the eighteenth century Appearance, discoloured.

196B. इति वधूसहितस्य गृहप्रवेशविधिः। अथ प्रायश्चित्तानि लिख्यन्ते।

The chapter on obsequies, as described by Eggeling, is not in the present manuscript. The expiations, dealt with from leaf 196B to the end of the present manuscript, are:—

196B, अथ व्याध्यादिनिमित्तककर्म्मसु संकल्पा लिख्यन्ते। एवं गुणेत्यादि-व्याधितत्त्वपरिहारार्थं षड़ाहुतिचरुहोमं करिष्ये ... ... तदङ्गमन्वाधानं करिष्ये; 197B, अशुभस्वप्नदर्शनसूचितारिष्टपरिहारार्थं प्रायश्चित्तं करिष्ये; 198B, अगमनीयागमननिमित्तकदोषपरिहारार्थं पुनर्मामैत्विति द्वाभ्यामाज्याहुती होष्यामि, 199B, अव्याधितस्वापकालीनादित्यास्तमयनिमित्तककर्म्मणि तु अव्याधितस्वाप-कालीनादित्यास्तमयजनितप्रत्यवायपरिहारार्थं प्रायश्चित्तं करिष्ये; 200A, अविहितकर्म्मश्रान्तस्वापकालीनादित्योदयजनितप्रत्यवायपरिहारार्थं प्रायश्चित्तं करिष्ये; 204A, सर्व्वप्रायश्चित्तं करिष्ये; 204B, औपासनहोमलोपजनित-प्रत्यवायपरिहारार्थं मनस्वत्याचतुर्गृहीतं होष्यामि; 206B, स्विष्टकृदर्थ-हविर्दोषनिमित्तमाज्येन स्विष्टकृद्यागं करिष्ये; 207A, गृहदाहनिमित्तमग्नये क्षामाय स्थालीपाकं करिष्ये; पर्व्वव्रतलोपनिमित्तमग्नये व्रतपतये स्थालीपाकं करिष्ये, 208A, कपालस्याशुचिसंसर्गनिमित्तमभिन्न इति द्वाभ्यामप्सु कपालप्रक्षेपं करिष्ये; अशुचिसंसर्ग-निमित्तं भूमिमित्यप्सु प्रक्षेपं करिष्ये।

In leaf 210 the MS. comes abruptly to an end. There is one more leaf marked 22 of another MS. belonging to the chapter on obsequies of Prayogaratna, as described in I.O. Catal. No 471. It gives the date of copying as Saṃvat 1818

संवत् १८१८ मिति ज्येष्ठ शुक्लसप्तमी भौमवासरे तद्दिने लिखितं भारद्वाजी उपाध्या लालजी शुभं भूयात्। इति नारायणभट्टकृत-प्रयोगरत्नः समाप्तः।

अच्छता गुर्व्विणी बन्ध्या विरक्ता च रजस्वला ।
नाम्नीयान्मथमं पिण्डं जारिणी च प्रसूतिका ॥

371.

295. *The Same.*

Substance, country-made paper 9×4 inches. Folia, 32 Line 7 on a page Extent in slokas, 390 Character, Nāgara Appearance old Incomplete

This is a mere fragment It comes up to the latter portion of Grahayajña, where it abruptly breaks

372.

3277. **विवाहपद्धतिः ।**

From the Prayogaratna of Nārāyaṇa Bhaṭṭa

Substance, country-made paper 9¼×4¾ inches Folia. 27. Lines, 9 on a page Extent in Slokas, 400. Character Nāgara Date, Śaka 1735. Appearance, fresh. Complete.

Colophons :—

16B, इति श्रीरामेश्वरभट्टसूरिसूनुनारायणभट्टकृते प्रयोगरत्ने कन्यादान प्रयोगः ।

24A, इति श्रीनारायणभट्टविरचिते प्रयोगरत्ने गौरिणीपूजादिचतुर्थदिन कृत्यम् ।

25A, इति प्रयोगरत्ने देवकोत्थापनादि ।

27B, इति विवाहे आशौचादिनिर्णयः ।

Post Colophon :—शके १७३५ इदं पुस्तकं देवस्वार इत्युपनामक जयरामसुत विष्णुः ।

373.

527. **पिण्डपितृयज्ञप्रयोगः । (प्रयोगरत्नीयः)**

For the manuscript see L. 1294.

Prayogaratna, to which Piṇḍapitṛyajña is stated in the colophon to belong, is attributed by Rājendralāla to Hari-

hara. It, however, agrees with the chapter on Pindapitṛyajna in Prayogaratna: see pp. 90-92 in Catal. No. 367.

The following authorities are found to be quoted:—(1) Āpastamba, (2) Āśvalāyana, (3) Rudradatta, (4) Haradatta-bhāṣya, (5) Viṣṇudharmottara, (6) Śrādhaprayoga.

Post Col.—श्रावणमासे शुक्लपक्षे चतुर्द्दश्यां भृगुवासरे तद्दिने ठाकुरोपनामकहरिणा लिखितं स्वार्थं परोपकारार्थं संवत् १८३८।
श्रीभैरवार्पणमस्तु।

374.

2682.

A fragment of Prayogaratna.

Substance, country-made paper 9¼×5 inches Folia, 21. Lines, 8 on a page Character, Nāgara Date, Samvat 1829 Appearance, fresh

Colophon:—

इति श्रीमद्विद्वन्मुकुटमाणिक्यश्रीरामेश्वरभट्टात्मजभट्टनारायणकृते प्रयोगरत्ने अष्टकाविकृतिप्रयोगः समाप्तः।

The object of the section is explained in the following lines.

एवं पञ्चविंशतिसंस्कारेषु गर्भाधानाद्या अष्टादशोक्ताः। इदानीं तु श्रवणाकर्म्माद्याः सप्तावशिष्टा उच्यन्ते॥

See Catal. No. 369.

3B, इति श्रवणाकर्म्म, 4B, इति सर्पबलिप्रयोगः; 5B, इत्याश्वयुजीकर्म्मप्रयोगः, 7A, अथ प्रत्यवरोहणम्; 13B, प्रयोगरत्ने स्मार्त्तपिण्डपितृयज्ञः; 17A, इत्यष्टकाश्राद्धप्रयोगः, 20B, इत्यन्वष्टकाप्रयोगः।

Post Colophon:—संवत् १८२९ शोभनाब्दे चैत्रशुद्ध १४ गुरुवासरे समाप्तः॥

375.

1982. उत्सर्ज्जनोपाकर्म्मप्रयोगः ।

From Prayogaratna by Nārāyaṇa Bhaṭṭa.

Substance, country-made paper. 8½ × 4 inches Folia, 11 Lines, 9 to 12 on a page. Extent in ślokas, 200 Character, Nāgara. Appearance, old and discoloured. Complete

The Utsarjana is a form of expiation for any defects that may crop in the recitation of the Vedas, and Upākarma is a ceremony to be performed at the commencement of the recital of the Vedas that these defects may be avoided In I.O. Catal. No 484 Eggeling's explanation of the terms utsarjana and upākarana to be ceremonies for the termination of and the commencement of the Veda is misleading.

The saṃkalpa of Utsarjana.

उपाकर्म्मदिने प्रातः शुचौ देशे सुस्नातः स्वासीन आचार्य्यः प्राणानायम्य देशकालौ स्मृत्वा ममाध्याप्यानां चाधीतानां छन्दादीनां यातयामतानिरासेनाप्यायनद्वारा श्रीपरमेश्वरप्रीत्यर्थं उत्सर्ज्जनाख्यं कर्म्म करिष्य इति संकल्प्य ।

Utsarjana ends in 9B

Col. :—इति भट्टनारायणकृतौ प्रयोगरत्ने उत्सर्ज्जनप्रयोगः ।

10A. अथोपाकरणम् ।

Samkalpa. अथाचार्य्यः सशिष्यः सुस्नातः स्वासन उपविश्य द्विराचम्य प्राणानायम्य देशकालौ स्मृत्वा ममाध्याप्यानां चाध्येष्यमाणानां छन्दसां यातयामतानिरासेनाध्ययनद्वारा श्रीपरमेश्वरप्रीत्यर्थं उपाकरणाख्यं कर्म्म करिष्य इति संकल्प्य ।

The last Colophon:—

इति श्रीभट्टनारायणकृते प्रयोगरत्ने उत्सर्ज्जनोपाकरणयोः प्रयोगः ।

श्रीकृष्णार्पणमस्तु ।

This comes to an end in lines 3, Fol 11, and in the remaining lines there is given a special form of Upākarma for a new Brahmacārī.

नूतनब्रह्मचारिण उपाकर्म्मविशेषः । अस्य ब्रह्मचारि + + + + + वेदग्रहणादिसिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं उपाकरण करिष्य इति संकल्प्य ।

376.

1107 धर्म्मप्रवृत्तिः ।

By Nārāyaṇa Bhaṭṭa.

Substance, country-made paper 8¼×3¼ Folia, 55 (of which the 2nd and the 3rd are missing). Lines, 8 on a page Character, Nāgara. Appearance, very old. Generally correct Fragment Repaired with transparent paper

For a description see I O. Catal. No. 1560. This fragment ends with Garbhādhāna ceremony. It is a manual of religious ceremonies and observances in accordance with Āsvalāyana ritual. Nārāyana Bhatta wrote this for Southern India. For his son Sānkara says in his Gādhivansānucarita Leaf 11B.

धर्म्मप्रवृत्तिरिति दक्षिणतः प्रसिद्धां
चक्रे समस्तबुधसंग्रथनाग्रगन्त्रीम् ।
विन्ध्योत्तरे व्यवहृतां तु बुधैः प्रयोग-
रत्नाख्यया निखिलसंस्कृतिपद्धतिं यः ॥

377.

2955. कर्म्मतत्त्वप्रदीपिका वा लघुपद्धतिः ।

Karmatattvapradīpikā or Laghupaddhati

By Kṛṣṇa Bhaṭṭa, the son of Puruṣottama.

For the manuscript and the work see L. 4134.

It is a very useful work, containing the expositions, and the rules for the performance, of all the important Gṛhya

rites and ceremonies. It consults the works of Jayanta, the well-known writer of the school of Āsvalāyana.

Besides the ancient Smṛtis and the Purāṇas, it quotes.—

मदनपारिजात 23B, स्मृत्यर्थसार 24A, माधवीय 24B, बह्वृचपरिशिष्ट 29A, प्रयोगसार 33B, स्मृतिसार 34A, परिभाषा 34A, कारिका 35B, 45B, कालादर्श 46B, कालनिर्णयः 52B, चन्द्रिका 53B, स्मृतिरत्न 81A, मेधातिथि स्मृतिसारसागर 84B, माण्डव्यसंहिता 83B, परिभाषा 96B, स्मृतिभास्कर 99A, स्मृतिचन्द्रिका 104B, रामार्चनचन्द्रिका 107A, विष्णुधर्म्मोत्तर 107A, हेमाद्रि 109A, नारायण 139A वाक्यसमुच्चय 140B

378.

6473. स्मार्त्तानुष्ठानपद्धतिः or प्रयोगरत्न ।

Smārtānuṣṭhānapaddhati or Prayogaratna.

By Ananta Dīkṣita

Substance, country-made paper $10\frac{1}{2} \times 4\frac{1}{2}$ inches Folia, 195, of which foll 38-63 are missing The gap has been filled up by twenty six leaves of an older manuscript, marked from 2-27 Lines, 9 on a page Extent in ślokas, 3500 Character, Nāgara of the nineteenth century Appearance discoloured Complete

Colophon.—इति श्रीमद् (–) यज्ञोपवीताभिधान (–) श्रीविश्वनाथसूनुना दौहित्रानन्तेन सर्व्वोपकाराय समन्त्रकप्रयोगः प्रायश्चित्तान्तो विरचितः ॥

For the work see L 2392. It belongs to Āsvalāyan School. The opening verse नमामि पार्व्वतीसूनुं etc, etc, is preceded by the three opening verses of Nārāyana Bhatta's Prayogaratna.

The MS. lacks the concluding verse quoted in L. 2392.

379.

2722. **सप्तपाकसंस्थाः ।** *Saptapākasaṃsthā.*

By Divākara, son of Mahādeva.

For the MS. and the work see L. 3220.

380.

2971. **आग्रयणप्रयोगः ।** *Āgrayaṇaprayoga.*

By Rāya Bhaṭṭa.

Substance, country-made paper. 9×5 inches Folia, 13. Lines, 14 to 16 on a page. Extent in ślokas, 390 Character, Nāgara of the seventeenth century. Appearance, old and discoloured. Complete

Rāya Bhaṭṭa, the author, was a son of the daughter of Kamalākara Bhaṭṭa, the well-known Smṛti compiler.

इति श्रीकानकुर्त्त्युपनामकभट्टवीरेश्वरात्मजमीमांसकभट्टकमलाकरदुहितृसुत-रायभट्टकृतः सोपोद्घात आग्रय[ण]प्रयोगः समाप्तः ।

The present MS. was copied by a son of Nīlakaṇṭha Bhaṭṭa. It is a good, old MS.

पुस्तकमिदमयाचितनीलकण्ठभट्टसुतायाचितवैद्यनाथेन लिखितं स्वार्थं परोपकृतये च ।

It begins :—

विश्वेशं पितरौ नत्वा भट्टमातामहानपि ।
रायभट्टेन विदुषा नवान्नेष्टिर्विविच्यते ॥
अथाग्रयणकालः । अथाग्रयणस्य विकृतित्वेन य एव सर्व्वासां विकृतीनां कालः स एव आग्रयणस्यापि कालः ।

It opens with a short disquisition on the rite,

381.

2957. संस्कारदीपिका। *Saṃskāradīpikā.*

By Dhuṇḍhirāja Bhaṭṭa, son of Pantojī Bhaṭṭa, son of Lakṣmaṇa Bhaṭṭa.

Substance, country-made paper 10×4¾ inches Folia, 70 Lines, 9 10 11 on a page Extent in Ślokas, 1800 Character, Nāgara Date, Samvat 1726 Appearance, discoloured Complete

Colophon —

इति श्रीमल्लक्ष्मणभट्टात्मज—पंतोजीभट्टसुत—ढुंढिराजभट्टविर-
चितायां संस्कारदीपिकायां स्थालीपाकप्रयोगः समाप्तः।

The date of the MS. preceding the colophon in a later hand. संवत् १७२६ समए कार्त्तिकसुदी पुरनवसीकं ह पुस्तकं लीप्य।

The maṅgalācaraṇa of the work.

श्रीरामं श्यामलं शान्तं रावणध्वंसकारकम्।
सच्चिदानन्दरूपं तं वंदे लोकैकपालकम्॥
गणेशं शारदामम्बां पितरं च पितामहम्।
प्रणम्य ढुंढिराजेन क्रियते दीपिका त्वियम्॥

The object of the work.

तत्र श्रीमन्नारायणभट्टपादैः प्रयोगपारिजातादिभिश्च प्रचुरशास्त्रार्थानां सविस्तरेण च प्रयोगाणामुक्तत्वात् नात्र किंचिदधिकं वक्तव्यमस्ति। तथापि बालानां वैदिकानां च षोडशकर्म्मणां तत्तत्प्रयोगकलनासम्भवात् तदाकलनात् संक्षेपेण प्रयोगानुष्ठानं यथामति वच्मि।

On the obverse of the first leaf :—यज्ञेश्वरभट्टलोध्योपनामकानामिदं पुस्तकम्।

382.

7987.

Substance, country-made paper 15¼×3 inches Folia, 15 Lines, 6 on a page Character, Bengali Date Śaka 1718 Appearance, fresh Complete

It relates to the Ṛgvedivahnisthāpana and opens with the maṅgalācaraṇa of Kāleśi, on which apparently it is based in the main.

Beginning:—ॐ नमो गणेशाय ।

नारायणं नमस्कृत्य नमस्कृत्य पदं गुरोः ।
निरूप्य यत्नतः सूत्रमाश्वलायनसंज्ञितम् ॥
सरस्वतीं नमस्कृत्य शौनकञ्च महामुनिम् ।
गृह्यार्थं विशदं कुर्म्मो बह्वृचां कर्म्मसिद्धये ॥

यद्यपि शौनकीये गृह्ये सनकार्थप्रतिपत्तिर्विदुषां जायते तथाप्यपठितवेदानां मन्त्रप्राप्तिरेव न स्यात्तदर्थमारम्भः ।

विवाहो बीजसेकश्च पुंसीमन्तकजातकम् ।
नामनिष्क्रामणं प्राशचूडोपनयनं दश ॥

तत्र सर्व्वकर्म्मणां प्रथमं मूलभूता कुशण्डिका कथ्यते ॥ यत्र क्वचिद्बोद्धव्यम् । तत्रैव विधिः प्रत्येतव्यः ॥ प्रथमं सङ्कल्प्याग्निस्थापनयोग्यं बाहुमात्रं स्थण्डिलं गोमयेनोपलिप्य प्रादेशमात्रं समिधमादाय तया षड्रेखा उल्लिखेत् ॥

No Colophon.

Post Colophon:—वय्वेकगोचेन्दुमिते शकाब्दे
नत्वा पदौ तौ भृगुलाञ्छनस्य ।
स्वकीय-चर्थैः प्रतिपादनाय
प्रालेखि शास्त्रञ्च खगेश्वरेण ॥

383.

2963. प्रयोगभूषा । *Prayoga Bhuṣā.*

Substance, country-made paper 8⅓ × 4 inches Folia, 46. Lines, 12, 13 on a page Extent in ślokas, 790. Character, Nāgara Appearance, discoloured. Incomplete at the end

It begins:—

अथ सप्त संस्थाः ॥

तत्र श्रावण्यां पौर्णमास्यां श्रवणाकर्म्म सर्पबलिश्च ॥ आश्वयुज्या-

माश्वयुजीकर्म्म। आग्रयणं च मार्गशीर्ष्यां प्रत्यवरोहणमिति। पञ्च।
पिण्डपितृयज्ञः। अष्टकाश्राद्धमिति॥

तत्रादौ श्रवणाकर्म्म सर्पबलिश्चेति द्वयमुच्यते। इदमत्र सूत्रं।
श्रावण्यां पौर्णमास्यां श्रवणाकर्म्माज्यतसक्तूनां॰ तावतो बलीस्तद्धरेव
उपहरन्ति।

Topics.—

3B, इति श्रवणाकर्म्म। अथ सर्पबलिः, 5A, इति श्रवणाकर्म्मप्रयोगः,
अथ सर्पबलिप्रयोगः; 6A, इति श्रवणाकर्म्मसर्पबल्योः प्रयोगद्वयं॥ अथाश्व-
युजीकर्म्म; 7A, अथाश्वयुजीकर्म्मणः प्रयोगः, 7B, इत्याश्वयुजीकर्म्मप्रयोगः,
अथाग्रयणं—सजूरित्यादि आग्रयणसूत्रम्, 8B, अथाग्रयणप्रयोगः, 9B, इत्या
ग्रयणप्रयोगः, अथ प्रत्यवरोहणं, 11A, अथ प्रत्यवरोहणप्रयोगः; 12A, इति
प्रत्यवरोहणप्रयोगः, अथेदानीं पूर्व्वेद्युः श्राद्धादौ पिण्डपि[तृ]यज्ञतन्त्रस्यापेक्षितत्वात्
प्रकरणान्तरगतोऽपि पिण्डपितृयज्ञ उच्यते। तत्रेदं श्रौतसूत्रं अमावस्यायामपराह्णे॰
स्तृणं द्वितीयमुन्नित इति; 16B, अथ पिण्डपितृयज्ञप्रयोगः, 18A, इति पिण्ड-
पितृयज्ञप्रयोगः, अथ पूर्व्वेद्युरष्टकान्वष्टकाश्राद्धानीति त्रयमेका संख्या, 19A, अथ
पूर्व्वेद्युः श्राद्धप्रयोगः; 20A, इति पूर्व्वेद्युः श्राद्धप्रयोगः, अथाष्टम्यामष्टकाश्राद्धं,
21B, अथाष्टकाश्राद्धप्रयोगः; 22B, अथान्वष्टकाश्राद्धं, 24A, अथान्वष्टका-
श्राद्धप्रयोगः, 26A, इत्यन्वष्टकाश्राद्धप्रयोगः।

26A अथ माघ्यावर्षश्राद्धं अष्टकावत् कुर्य्यात् ……… अथ पार्व्वणश्राद्धं;
33A, इति प्रयोगभूषायां पाकसंस्थाप्रयोगः।

श्रीकृष्णार्पणमस्तु, अथ सर्व्वेषां होमानां प्रकृतित्वात् स्थालीपाक उच्यते।

The name of the work *Prayoga Bhūsā* is to be found only in leaf 33A It gives expositions first, of the sūttra on a sacrifice, then the details in its performance. It belongs to the school of Āsvalāyana.

14B, अप्सु इतरौ प्रक्षिपेत्। तेनाश्वलायनानां जले प्रक्षेप एव पिण्डानां
सर्व्वमुख्यः पक्षः

29A, पितृस्थानेष्वेव होमो नान्येष्वित्यन्ये। नाश्वलायनपरं शाखान्तर-
परं चेति।

Prayoga Bhūṣā, unknown to Aufrecht, seems to be a very comprehensive work, of which the present MS seems to contain a mere fragment. The author's name does not appear in any of the leaves; he speaks of Nārīdharmamīmāṇsā as another work of his.

As shown above, it begins with Saptapākasaṃsthā. As there is Saptasomasaṃsthā, there is also Saptapākasaṃsthā or a set of seven sacrifices enumerated at the beginning, in which cooked rice is offered In leaf 33A, Pākasamsthā ends, and sthālīpāka begins. The MS abruptly comes to an end, while dealing with the latter.

The authorities quoted and consulted.—

1B, कारिका, भट्टैः; 2A, जयन्तः, पारिजाते शौनकोऽपि; 2B, आपस्तम्ब, 3A, कारिका, सूत्रवृत्तिः, 8A, वृत्तिकृत्, 9B, ऋग्विधान, पैठीनसि, 14A, पृथ्वीचन्द्रोदये भविष्यवचनात्; 18A, कात्यायनसूत्र; 20B, उक्तं च निरुक्ते; 26B, कपर्द्दि-धूर्त्तस्वामि-हेमाद्र्यादयः, गृह्यपरिशिष्ट, गौड़ाः, इति मानवसूत्रमत्रमनुः, 27A, श्राद्धचिन्तामणिः; जयन्तभाष्य; 27B, शाकल-कारिका, शंखादिवाक्यैः, 28A, मत्कृतनारीधर्म्ममीमांसायां, देवत्रातभाष्य; 28B, कात्यायनभाष्य, 28B, सिद्धान्तभाष्य; 29A, श्राद्धचन्द्रिका; 29B, बौधायन, श्राद्धसार; 30A, स्मृतिसंग्रह, धर्म्मसार, उज्वलायां, 30B, ब्रह्मपुराणे; विधानपारिजाते; 31A, सनत्कुमारसंहिता; स्मृत्यर्थसार; 31B, मार्कण्डेयपुराणे; श्राद्धतत्त्वे; 32A, इति मैथिलाः; 33B, इति पितामह-चरणाः, प्रयोगपारिजातवचनात्; 34A, इति सांप्रदायिकाः, आदित्यपुराणे, 34B, कालादर्शे; महानिवन्ध बह्वृचकारिका; 35A, पारिभाषिके तु; 35B, बह्वृचपरिशिष्ट; इति पितृचरणाः, 37A, सुमन्तु; छन्दोगपरिशिष्ट; गौतमः; 37B, मत्स्यादौ; 38A, भविष्योत्तरे तु; प्रयोगदीपिका; 38B, गृह्यपरिशिष्टे; गृह्यभाष्यकारैः; 39A, प्रयोगरत्ने परिशिष्टेऽपि; 41A, प्रतिष्ठासारोक्तेः; 41B, शारदातिलके, क्रियासारे, 42A, वायवीयसंहितावचनात्, रामवाज-पेय्यां, कुण्डरत्नाकरे; 42B, सिद्धान्तशेखरे, 43A, मात्स्यवाक्यात्; तदुक्तं मूलागमे; 44A, मानवसंहिता; संग्रहोक्तेः; 44B, गारुड़े; प्रतिष्ठासारे; रूपनारायणमते, 45A, प्रतिष्ठासारे, इति कामिकोक्ताः,

384.

78. प्रयोगसर्व्वस्व । *Prayogasarvasva.*

Substance, country-made paper $9\frac{1}{2} \times 4\frac{1}{2}$ inches. Folia, 78 Lines, 9 on a page Extent in ślokas, 1390 Character, Nāgara Date, Sam. 1871. Appearance, tolerable Complete

Directions for the rituals of the sacramental rites, for a Brāhmaṇa householder. The compilation is anonymous and apparently belongs to the Ṛgveda, as there is the assertion "न मम" "not mine" after repetition of the deities' names, which is peculiar to the Ṛgveda, and as also the compilation opens with a salutation to Āśvalāyana. The maṅgalācaraṇaśloka, however, is borrowed from Nārāyaṇa Bhaṭṭa's Prayogaratna

It begins thus:—

श्रीगणेशाय नमः ।

श्रीरामं सपरिवारं गणेशञ्च सरस्वतीं ।

आश्वलायन-तच्छिष्यान् प्रणम्य पितरं गुरुं ॥

अथ किञ्चित् संक्षेपेण प्रयोगमात्रमुच्यते । यजमानः कृता-भ्यङ्गादिः स्वलङ्कृतो दर्भपाणिः शुचिर्भूत्वा मङ्गलसम्भारं सम्भृत्य स्वलङ्कृते गृहे गोमयोपलिप्तभूमौ सोत्तरच्छदे भद्रासनेऽप्राङ्मुख उपविश्य स्वदक्षिणपार्श्वे संस्थाप्य उदङ्मुखमुपवेश्य रङ्गवल्लिकायुक्ते भूतले प्रस्थपरिमित[स्य] + + [प]रिमितस्य वा धान्यस्योपरि दक्षि-णोत्तरयोः सुवर्णरजतताम्रमृन्मयान्यतमकलसद्वयमव्रणं मनोहर-मलङ्कृतं शुद्धपुण्यजलपूरितं सपल्लवं निधाय सूत्रवेष्टितोत्तरकलशे पञ्च रत्नानि निक्षिप्य तदुपरि सिततण्डुलपूरितसपल्लवपात्रं निधाय तत्पश्चिमदेशे प्रतिवचनसमर्थांस्तद्दिवसे श्राद्धादिष्वभुक्तवन्तो निषिद्ध-प्रतिग्रहनिवृत्तान् शुचीन् सोत्तरीयान् दर्भपवित्रपाणीन् युग्मान् ब्राह्मणान् प्राङ्मुखान् आसने उपवेश्य गन्धपुष्पादिभिरभ्यर्च्य यथाचारं ॥ सुमुखश्च इत्यादि॰ लक्ष्मीनारायणाभ्यां नमः इत्यादि ।

End :— ततो गृहप्रवेशनीयहोमः कार्य्यः । ततः शुभदिने स्वस्त्यादि वाचयित्वा स्वलङ्कृतः स्वलङ्कृतां रात्रावुपगच्छेत् ।

The last Colophon :— इति वधूसहितस्य गृहप्रवेशविधिः इति विवाहान्तप्रयोगः ।

Post Colophon :— इदं पुस्तकं लिखितं गांजीव्यासोपनाम स्वार्थं परार्थंच्च

इदं पुस्तकं समाप्तं ।

संवत् १८७१ शाके १७३५ जेष्ठ कृष्ण ६ गुरुवा ।

385.

2876. *A Gṛhya work by the son of Viśvanātha.*

Substance, country-made paper $9\frac{1}{2} \times 4\frac{1}{2}$ inches. Folia, 59 Lines, 16 on a page. Extent in slokas, 2800. Character, Nāgara of the early seventeenth century Appearance, discoloured. Incomplete

It begins :—

नत्वा गणपतिं देवीं मातरं पितरं तथा ।

स्मार्त्तकर्म्मोदितं सारमुद्धृत्य परिलिख्यते ॥ १ ॥

आश्वलायनशाखेऽस्मिन् सन्ति पद्धतयः शतम् ।

विनापुस्तकमार्गेण कर्म्म कर्त्तुं न शक्यते ॥ २ ॥

तदर्थं क्रियते यत्नः पाठशोधहितानि च (?)

सुलभोपायसिद्ध्यर्थं वैदिकानां तदुच्यते ॥ ३ ॥

भट्ट विश्वनाथ सुतो + + + + +

+ + + + + + + ॥ ४ ॥

पञ्चविंशतिसंस्कारैः संस्कृता ये द्विजातयः ।

ते पवित्राश्च योग्याः स्युःश्राद्धादिषु सुयन्त्रिताः ॥

गर्भाधानं पुंसवनं सीमन्तो बलिरेव च . इत्यादि ।

Mainly based on Bhatta Nārāyaṇa's Prayogaratna

On the obverse of the first leaf, it is called (in a later hand) विश्वनाथीया पद्धतिः

386.

6464. प्रयोगदर्पण । *Prayogadarpana.*

By Nārāyaṇa Yajvā, son of Cāyam Bhaṭṭa.

Substance, country-made paper 10 × 1¾ inches. Folia, 172 Lines, 11 on page Character, Nāgara of the nineteenth century Appearance, fresh Incomplete at the end

An authoritative compendium of domestic rites and observances, of the school of Āsvalāyana

Sl. 2 नत्वा गृह्यपतिं देवं मातरं पितरं तथा ।
आश्वलायनमाचार्यं शौनकादिमुनींस्तथा ॥

Sl 3. चायंभट्टसुतः श्रीमान् यज्वा नारायणो ह्यहं ।
प्रयोगदर्पणं नाम ग्रन्थं कुर्वे मनोहरम् ॥

For a description of the work and the authorities it quotes, see I.O. Catal. No. 469.

171B, अथ गुरौ सिंहस्थे अतिचारस्थे भृगुणा समसप्तकस्थे मूढत्वे च कार्याकार्यनिरूपणं । This is the last topic in this incomplete MS.

Among the authorities, is found Prayogapārijāta (171B—प्रयोगपरिजाते श्रीपतिः) omitted in I.O. Catal.

387.

2866. आपदेवीय प्रयोगः । *Āpadevīyaprayoga.*

Substance, country-made paper 8¼ × 5 inches. Folia, 18 Lines, 13 on a page Extent in slokas, 450 Character, Nāgara of the early nineteenth century Appearance, mouse-eaten Incomplete

अथाग्रयणप्रयोगो लिख्यते ।

The authorities consulted.

1A त्रिकाण्डमण्डन, कात्यायन, तन्त्ररत्न by पार्थसारथि, त्रिकाण्डमण्डनकार, धूर्तस्वामी, 1B बौधायन हेमाद्रि, दीपिका, 2A, आश्वलायन, आश्वलायनीय-स्मार्तसूत्र, शौनक; 2B, प्रयोगपारिजात; 6A, रुद्रदत्त, भरद्वाज,

दिनकरोद्योत 6B, नीतिसूत्र, सिद्धान्तभाष्य; 8A, कारिका; 9B, शाकल-कारिका; दशपुत्रकृतान्त्येष्टिपद्धति; 13B; ब्राह्मणभाष्ये मनुः 15B, कपर्दि-कारिका; 16A, वराहसूत्र; 16B, सत्याषाढ़; 17A, आश्वार्कभाष्य, 17B, नारायणभाष्य, नारायणवृत्तिः।

Topics: 6A, इत्यापदेवकृताग्रयणप्रयोगः, अथ जातेष्टिः; 6B, इत्यापदेवीये जातेष्टिनिर्णयः, अथ आहिताग्न्योर्दम्पत्योः दाहाग्निविषयकाणां वचनानां व्यवस्था, 10B, इत्यापदेवीये दाहाग्निनिर्णयः, अथ गृह्याग्नेः पिण्डपितृयज्ञनिर्णयः; 11B, अथ विधुराधाननिर्णयः, 12B, अथ विधुरोपासनम्;

388.

6202. Two works.

I. ऋषितर्पणकारिका। *Ṛṣi-tarpaṇakārikā.*

By Anantadeva.

Substance, country-made paper 9½×5 inches Folia, 2 Lines 8 on a page. Extent in ślokas, 24 Character, Nāgara. Date, Samvat 1848 and Śaka 1713. Appearance, discoloured Complete

The number of kārikās—12.

Colophon:—इति अनन्तदेवकृत-ऋषितर्पणकारिका।

Post Colophon:—संवत् १८४८ शाके १७१३ प्रवर्त्तमाने दक्षणायने गते श्रीसूर्ये शृङ्गारतौस्था (?) माङ्गल्यमासोत्तममासे आश्विनमासे शुभे कृष्णपक्षे तिथौ १२ रविवासरेण लिखितं औदीच्यसिद्धपुरा दवे मथुरानाथ तत्पुत्रची०वैजनाथ स्वहस्तेन लिखितं वुंदीग्राममध्ये राज्य राव राजाजी श्रीविष्णुसिंहजी। श्रीआवुश्वरसन्निधौ।

Beginning:—श्री गणेशाय नमः।

अथ अनन्तदेवकृत-ऋषितर्पणोक्ता कारिका लिख्यते।
पौषस्य रोहिणीमष्टामष्टकां प्राप्य मध्यमां।
उदकान्तं समासाद्य वेदस्योत्सर्ज्जनं वहिः॥ १॥
स्नातव्यं विधिवत्तत्र स्थापयेदृष्यरुन्धती।
प्रवरांश्च ततोधीमान् कुर्य्यात् तेषां प्रतिष्ठितम्॥ २॥

II. ऋषितर्पणकारिका। *Ṛṣi-tarpaṇakārikā.*

Substance, country-made paper 9½×4 inches Folia, 4. Lines, 8 on a page Character, Nāgara Date, Samvat 1818 Appearance, discoloured. Complete

Colophon :—इति ऋषितर्पणं समाप्तम्।

Post Colophon:—संवत् १८४८ शाके १७१३ प्रवर्त्तमाने दक्षिणायने गते श्रीसूर्य्ये ऋवारभौ ह्यामाङ्गल्यमासोत्तममासे आश्विनमासे शुभे शुक्लपक्षे तिथौ वारे रविवासरेण लिखितम्। औदीच्य सिद्धपुरा दवे मथुरानाथजी तस्यात्मज-चौ०जीववैजनाथ स्वहस्तेन लिखितं वुदिग्राम मध्ये राज्य रावराजाजी श्रीविष्णु सिंहजी। श्रीरस्तु दन्तिका। श्रीअवुश्वरसन्निधौ। आत्मा वीरेश्वराय नमः।

यादृशं पुस्तकं etc.

Number of kārikās, 26.

Beginning:— श्री गणेशाय नमः।

अथ ऋषितर्पणोक्तकारिका लिख्यते।
गणेशं पितरं नत्वा गुरुमानन्दरूपिणम्।
सम्प्रदायानुसारेण वक्ष्यामि ऋषितर्पणम्॥
पौषस्य रोहिणीमृक्षं चाष्टकां प्राप्य मध्यमां।
उत्सर्गस्तु प्रकर्त्तव्यः श्रावण्या गौणकालतः॥ २॥
सर्व्वसम्भारसंयुक्तं गच्छेत् पुण्यजलाशयम्।
उदकान्तं समासाद्य गुरुः शिष्यजनैर्युतः॥ ३॥

End :—विलोक्य सूत्रं त्वथ कारिकाश्च

ग्रन्थान्तरात् सारतरं प्रगृह्य

The second half of the stanza is wanting.

No. II. appears to be an amplification of No. I.

389.

1983. उत्सर्ज्जनोपाकर्मप्रयोग *Utsarjanopākarmaprayoga.*

Substance, country-made paper 7¾×4¾ inches Folia, 20 Lines, 11 on a page. Extent in ślokas, 400 Character, Nāgara. Date (?) Appearance, old and discoloured Anonymous.

The ceremony of Utsarjana ends in line 2, 17A, where begins Upākarma.

1B, उपाकर्म्मदिने प्रातः शुचौ देशे सुस्नातः स्वासीनः आचार्य्यः शिष्यैः सह प्राणानायम्य देशकालौ स्मृत्वा सुमुखश्चेत्यादिसंकल्पं कृत्वा शुभपुण्यतिथौ ममा०र्थं अस्थानोच्चारघोषणाध्ययनाध्यापनयजनयाजनादिभिः प्रमादिकैः प्रख्यापन-प्राध्ययन-प्रश्नपूर्व्वं प्रतिग्रहादिभिर्यज्जातं श्रुतीनां यातयामत्वं तत्परिहारद्वारा यान्यै-स्वाधीतानां श्रुतीनामाप्यायनार्थं सवीर्य्यसिद्ध्यर्थं माघ्यां पौर्णमास्यां अमुककल्पत्वेन विहितं तद्देशकालादिवशादेदविस्मृत्यादिदोषपरिहारार्थं ऊनकल्पत्वेन विहितं उपाकर्म्मदिने आदौ अन्तरितं उत्सर्ज्जनाख्यं कर्म्म करिष्ये। अयं मुख्यसंकल्पः।

17A. आचार्य्यः सुस्नातः प्राणानायम्य देशकालौ स्मृत्वा अध्येतॄणा-मधीयानानामध्येष्यमाणानामध्याप्यानां च अस्थानोच्चारविच्छेदक्रोशघोषणाहृतह्रस्व-चारितवर्णानां पूर्व्वसवर्णागमलोपविलम्बितह्रस्वचारितवर्णानां श्लिष्टवर्णविघटन-दृष्टग्रस्तोद्दृष्टादिभिः प्रमादिकैः श्रुतीनां यज्जातं यातयामत्वं तत्परिहारार्थं सर्व्वेषां छन्दसामाप्यायनार्थं सवीर्य्यत्वार्थं (?) च नवोपनीतानां वेदग्रहणाधि-कारार्थमितरेषामुत्सृष्टानां वेदानां च पुनर्ग्रहणार्थं च यावदधीतमन्त्रराशित्वेन यद्दैवतोपासनया श्रौतस्मार्त्तकर्म्मानुष्ठानतया च यथावत्फलप्राप्त्यर्थं श्रीपरमेश्वर-प्रीत्यर्थमद्य उपाकर्म्माख्यं कर्म्म करिष्ये।

The manuscript of Upākarma is incomplete.

On the upper margin of 22B this is attributed to Bhaṭṭa Nārāyana. The entry is in Bengali.

प्रयोगरत्नान्तर्गतउत्सर्ज्जनोपाकर्म्मप्रयोगः उपाकर्म्मप्रयोगस्य अन्तिमं खण्डितं। ग्रन्थकर्त्ता भट्टनारायणः।

This is evidently wrong, as in leaf 2A it quotes Kamalākara, the grandson of Bhatta Nārāyaṇa.

390.

2454. **उत्सर्ज्जनोपाकर्म्मप्रयोग।** *Utsarjanopākarmaprayoga*

By Vāpubhaṭṭa belonging to the School of Āśvalāyana.

Substance, country-made paper 8½ × 4 inches Folia, 45. Lines, 7 on a page Extent in ślokas, 528 Character, Nāgara of the nineteenth century. Appearance, discoloured Complete

For the manuscript and the work see L. 3238.

It begins :—आश्वलायनमाचार्य्यं नत्वा च विमलेश्वरं

A short work entitled सभादीपदान is added at the end, as a supplement to the main work.

अथ आचारप्राप्तं सभादीपदानम् । उक्तं च गोपीनाथभट्टीयं ।

व्रीहितण्डुलपिष्टानां पलाष्टौत्या विनिर्म्मितम् ।
घृतवर्त्तिसमायुक्तं विमले कांस्यभाजने ॥ इत्यादि

Post Col. :—शके १७

391.

6462.

Substance, country-made paper. $10 \times 1\frac{1}{2}$ inches Folia, 14. Lines, 11 on a page Extent in ślokas, 350 Character, modern Nāgara. Appearance, fresh Complete

A treatise on *utsarga* and *upākarma*.

Beginning :—श्री गणेशाय नमः ।

लेभिरे देवताः सर्व्वा यां समाराध्य मङ्गलम् ।
सा सर्व्वमङ्गला नित्यं करोतु मम मङ्गलम् ॥
श्रौतस्मार्त्तप्रणेतारं नत्वा नारायणं गुरुम् ।
सूत्रानुसारिणी ह्येषा पद्धतिस्तन्यते मया ॥

तत्रादौ किञ्चिदुच्यते । विशेषस्तु नारायणभट्टकृताध्यायोत्सर्गोपाकर्म्म-पद्धतावुक्तः । स ततोऽनुसन्धेयः । अत्र तु केवलं सूत्रानुसारिणी सरणिस्तन्मेणा लिख्यते । तत्रेत्थं यदेतदुत्सर्ज्जनं उपाकर्म्मदिने कार्य्यं तदेवाह । पुष्ये तूत्सर्ज्जनं कुर्य्यादुपाकर्म्मदिनेऽथवेति हेमाद्रिधृतखादिरगृह्योक्तवचनेन उपाकर्म्मदिने वोत्सर्गं कुर्य्यादिति ।

कथमुत्सृजेयुरितिचेदुच्यते उदकान्तं गत्वेति सूत्रम् ।

3B, इति उत्सर्गविधिः 4B, ततस्तस्मिन् वक्ष्यमाणक्रमेणोपाकर्म्म कुर्य्यात्—इत्यलं—5A अथोपाकर्म्मसरणिः— under this heading it gives the pratīkas or the initial letters of *mantras* from all the four vedas.

It ends with the pratīkas of the Atharvaveda—

End:—विंशतिमे नवमः। विंशतिमं कांडं समाप्तं। अथर्ववेदस्वरूपिणा परमात्मने नमः। तत उत्तरपूजां कुर्य्यात्..............अनेनोत्सर्गोपाकर्म्मणा तेन श्रीभगवान् परमेश्वरः प्रीयतां न मम॥ उत्सर्गश्चार्द्धषष्ठान् मासानधीत्योत्सृजेयुरित्येवम्॥

392.

2941. **ग्रहयज्ञप्रयोग।** *Grahayajñaprayoga.*

For the MS. and the beginning and end of the treatise see L. 4070.

It treats of the method of offering sacrifices to the nine planets, as directed in the supplement to the Āsvalāyana Gṛhya sūttras, which should precede every one of the domestic rites.

The Saṃkalpa runs:—

'गर्भाधानादिषु अमुककर्म्मकर्त्तुं आदित्यादिग्रहानुकूल्यतासिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं ग्रहयज्ञं करिष्ये।

28A, अयं च आश्वलायनगृह्यपरिशिष्टोक्तो ग्रहमखः। आश्वलायनानामेव।

393.

2686A. **वेदपारायण विधि।** *Vedapārāyaṇavidhi.*

By Kamalākara.

Substance, country-made paper. 9¼ × 5¼ inches. Folia, 27. Lines, 5 to 8 on a page. Character, Nāgara. Date (?). Appearance, fresh. Complete.

Vedapārāyaṇavidhi begins—

अथ वेदपारायणं। तत्रादौ कलशस्थापनाद्युक्तं मह्दार्णवे।

तीर्थे देवालये गेहे प्रशस्ते सुपरिष्कृते।

कलशं सुदृढ़ं तत्र सुनिर्णिक्तं सुभूषितम्॥ इत्यादि

It ends in 3B.

The subsequent leaves contain 2686B for which see Catal. 253.

394.

3268. अन्वाधान। *Anvādhāna.*

Substance, country-made yellow paper 9×4 inches Folia, 7. Lines, 5 on a page Extent in ślokas, 100 Character, Nāgara of the nineteenth century Appearance, fresh.

The leaves contain, at the left-hand upper margin, अन्वा॰ evidently the abbreviation of Anvādhāna. It is practically the same work as Catal. No. 251, but with more of ritual and less of anukramaṇikā.

5B. इति ऋग्विधानाद्युक्तो वेदपारायणविधिः। अथ प्रयोगः।

It begins:—

नत्वो-मा माधवौ देवौ ब्रह्मणे च स्वयम्भुवे।
ऋग्वेदमन्त्रदृग्भ्यश्च शौनकादिभ्य एव च॥ १॥
ऋग्विधानादिकं दृष्ट्वा ऋग्वेदे देवताक्रमम्।
वालखाणश्रोत्रियोऽत्र वक्ष्ये होमविधानकम्॥ २॥
सिद्धमन्त्रविधानेन जपहोमैर्द्विजोत्तमः।
तपसा स्वर्गमाप्नोति तपसा विन्दते महत्॥
तपोयुक्तस्य सिध्यन्ति कर्म्माणि नियतात्मनः।
विद्वेषणं संवननं विषघ्नं रोगनाशनम्॥
येन येनार्थमृषिणा यदर्थं देवता स्तुता।
स स कामसमृद्धश्च तेषां तेषां तथा तथा।
तानि कर्म्माणि च वक्ष्यामि विविधानि च कर्मणाम्॥
पुरश्चरणमादौ तु कर्म्मणां सिद्धिकारकम्।
स्वाध्यायाभ्यसनस्यादौ प्राजापत्यं चरेद् द्विजः।

395.

5879 पञ्चमहायज्ञपद्धति। *Pañcamahāyajñapaddhati* (*Āśvalāyanīyā*).

By Nīlakaṇṭha, son of Viśvanātha Bhaṭṭa, son of Śrīdhara Bhaṭṭa, son of Kṛṣṇa Śarmā, son of Śrīdhara

Substance, country-made paper $9\frac{1}{3}\times4\frac{1}{4}$ inches Folia, 19 Lines, 9 on a page Extent in ślokas, 380 Character, Nāgara of the eighteenth century. Appearance, discoloured. Complete.

Beginning :—

श्रीगणेशाय नमः ।

गोपालं गोपिसहितं मल्लारिं चंद्रलाम्बिकाम् (?)

प्रणम्य क्रियते पञ्च महायज्ञस्य पद्धतिः ॥

[श्री]श्रीधरस्य सूरेर्वै कृष्णशर्म्मा सुधीर्महान् ।

तत्सूनुः श्रीधरः प्राज्ञः विश्वनाथमजीजनत् ॥

तस्य पुत्रः कविः शान्तो नीलकण्ठ इति स्मृतः ।

तेनेयं विदुषां प्रीत्यै निर्म्मिता पद्धतिः शुभा ॥

कृतावश्यको लब्धगुर्व्वनुग्रहो जलाशयान्तिकासीनः आचान्तः ॐ मानस्तोक इत्यनेन शिखां बद्धा आचम्य आसनविधिं कृत्वा गायत्र्या प्राणानायम्य तिथ्यादि स्मृत्वा आत्मनोऽमुकस्य वा क्षिप्रममुकरोग-शान्त्यर्थं श्रीमार्त्तण्डभैरवप्रीत्यर्थं वा तृचकल्पोक्तविधिना श्रीसूर्य्या-र्घ्यदानमहं करिष्ये ॥

Looks like a combination of Tāntrika and Vaidika rituals.

1166.

5863. आचारतिलकम् । *Ācāra-tilakam.*

By Gangādhara.

Substance country-made paper $8\frac{1}{2} \times 4\frac{1}{4}$ inches Folia, 9. Lines, 10 on a page Extent in ślokas, 180 Character. Nāgara of the nineteenth century Appearance, discoloured. Complete

Beginning :—

श्रीगणेशाय नमः। श्रीगुरुभ्यो नमः।
अथ साधारणं सर्व्वेष्वाधानादिषु कर्म्मसु।
विधिरालोच्य गृह्यादिः सम्यक् संगृह्यते मया॥
ततः स्मृतिविधिनाचमनं लिख्ये (?)
तत्र दक्षः।
आधानादिक्रियाः सर्व्वाः श्रौते स्मार्त्ते च कर्म्मणि।
प्रतिष्ठा सर्व्वदेवानां वह्नीनां स्थापनादिभिः॥

This is a very incorrect manuscript. It gives 139 kārikās, relating to the establishment of the sacred fire

संस्रवप्राशनं
संस्रवप्राशने चामे कुर्य्याच्छुद्धिः स्वकारणात् (?)।
प्रणीता विमोकं पश्चात् आयुष्यार्थौ प्रपंचरेत् (?)॥ १३८॥
पुरा(ग्रन्थेनमालोक्य) ग्रन्थान् समालोक्य सन्देह ईरिसं मया(?)।
कारिकारचितं वन्दे गङ्गाधरविधिः स्मृतः॥ १३९॥
अपारदीपिकां ज्ञेयं सर्व्वकर्म्मणि साधितम्।
स्वल्पं स्वल्पतरश्चैव निरीक्ष्यं पण्डितैर्बुधैः॥
परोपकरणं वक्ष्ये कुर्य्यांश्च तु साधनम्॥ (?)

Colophon :—

इति श्रीगङ्गाधरविरचितमाचारतिलकं सम्पूर्णम्।

1167.

6282. स्मार्त्तपदार्थसंग्रहः *or* प्रयोगपद्धतिः।

Smārta-padārtha-saṃgraha.

By Gangādhara, an inhabitant of Kolāpura.

Substance, country-made paper 9⅓ × 4 inches Folia, 77 Lines, 9 on a page Extent in ślokas 1300 Character, Nāgara of the eighteenth century Appearance old and discoloured Complete

An exposition of the Vedic rites and ceremonies, of the school of Kātyāyana.

Beginning :—

गणनाथं नमस्कृत्य शारदां गुरुमेव च ।
वैक + + कात्यषिच्छन्दों देवता गृह्यकर्म्मसु ।
देवतानामभिधानं वक्ष्ये संकल्पपूर्व्वकम् ॥ १ ॥
अग्न्याधानं द्विजेन्द्राणां स्या[त्] कृत्तिकाविशाखयोः ।
रेवतीरोहिणीपुष्यमृगज्येष्ठोत्तरात्रये ॥

12A, इति श्रीगङ्गाधरभट्टविरचितायां [प्रयोगपद्धतौ] स्मार्त्तपदार्थसंग्रहे आधानं समाप्तम्; 13B, इति स्मार्त्तपदार्थसंग्रहे मणिकाधानं समाप्तम्, 20A, इति प्रयोगपद्धतौ पञ्चमहायज्ञाः— अथ सायं प्रातर्होमविधिः, 22A, अथ समिधः; 22B, अथ समिद्‌वृत्ताः; 24A, अथ पक्षादिकर्म्मप्रयोगः; 28B, अथ पिण्डपितृयज्ञः; 32B, अथ नवान्नप्राशनम्; 36B, अथ उपाकर्म्म; 44B, श्रीगङ्गाधरभट्टविरचितायां प्रयोगपद्धतौ उपाकर्म्म समाप्तम् ।

कोलापुर प्रवरपीठ निकेतनां त्वां
लक्ष्मीं महापदयुतां पुरतः पुराणाम् ।
वेलापदे तु वरदानवशंगतानां
श्रान्ताम्बिकाञ्च कुलमातरमानतोऽस्मि ॥
विश्वेश्वरं हरिहरौ च सरस्वतीञ्च
कात्यायनञ्च निजसूत्रकृतं प्रणम्य ।
श्रीरेणुकादिवरपद्धतिसन्मतानि
संवीक्ष्य पाकमखपद्धतिमातनोमि ॥

50A, इति श्रीगङ्गाधरभट्टविरचितायां प्रयोगपद्धतौ श्रवणाकर्म्म— अथ इन्द्रयज्ञ उच्यते ।

53A, अथ पृषातकोकर्म्म उच्यते; 56A, अथ हस्तरारोहणमुच्यते; 57B, अथ अष्टकाकर्म्म उच्यते; 64A, अथ वृषोत्सर्गः; 69A, इति पायसप्राशनं समाप्तम्—समाप्तश्च पाकयज्ञः ।

अथौपासने प्रायश्चित्तविधिं व्याख्यास्यामः, etc.

(Last Colophon):—

इति गङ्गाधरपद्धतौ प्रायश्चित्तम् ।

Post Colophon :—

ब्रह्मार्पणमस्तु । नित्यश्रीरस्तु । लेखकपाठकयोः ।

गोदावरीतीर नारायणभट्टस्यास्तु मङ्गलमाहेश्वरी शुभम् ॥

It ends :—

यदास्पृष्टे लङ्घिते वा पात्रे क्षालनमेव च ।

अरण्योस्तु तक्षणमेव ।

1168.

278. *The Same.*

Substance, country-made paper $9\frac{1}{2}\times4\frac{1}{2}$ inches. Folia, 73 Lines, 9 on a page Extent in ślokas, 1300 Character, Nāgara. Date, Sam 1890 Appearance fresh. Prose Generally correct Complete

It begins :—

गणनाथं नमस्कृत्य शारदां गुरुमेव च ।

आधानपद्धतिं कुर्व्वे स्मार्त्तसंग्रहकारकम् ॥ १ ॥

It ends :—

यदास्पृष्टे लङ्घिते वा पात्रक्षालनमेव । अरण्योस्तु तक्षणमेव ।

Col. :— इति गङ्गाधरभट्टविरचितायां प्रयोगपद्धतौ प्रायश्चित्तविधिः समाप्तम् ।

Post Col —

संवत् १८९० माघी वद्य१४ रविवारे । शुभमस्तु ।

नारायणगणेशजोसीदिं डुरकरयां चे पुस्तक आसे श्रीभद्रकाली प्रसन्नम् ।

10A. इति श्रीगङ्गाधरभट्टविरचिते स्मार्त्तपदार्थसंग्रहे आधानं समाप्तम् ।

The authorities quoted :—

(1) Gadādhara Bhāsyām 2B. (2) 21B, Vājasaneyī and (3) Kātyāyana

1169.

1277. *The Same.*

Substance, country-made paper 10×4 inches. Folia, 56, of which 9-10, 16-19, are missing Lines, 12 on a page Extent in ślokas, 1450 Character Nāgara Date, Sam 1652 Appearance, old Generally correct Complete

Col. :—

इति गङ्गाधरविरचितं स्म[ा]र्त्तपदार्थसंग्रह समाप्ता ॥ (?)

Post Col. :—

संवत् १६५२ समये काह्नोपाध्यायेन लिखितं आत्मार्थं कौमौत् परोपकारार्थं शुभस्तु ।

Beginning :—

श्रीगणेशाय नमः । अथौपासने प्रायश्चित्तं व्याख्यास्यामः । अरुणोदये उत्थाय अग्निं प्रादुष्कृत्य दन्तधावनपुरःसरं यथाविधि स्नायात् ।

It ends :—

स्मृतिसंग्रह—विष्णुकात्यायनौ,

दर्शे पौर्णमासे वा परान्नौ पाकसेवनं ।

ते नरा क्रियावज्ज्या सर्व्वे यदुच्छिष्ठ भवेत् । (?)

1170.

6220. संस्कारपद्धतिः । *Saṃskāra-paddhati.*

By Gangādhara

Substance, country-made paper 10×3½ inches Folia, 25 Lines, 7 on a page. Character, Nāgara of the eighteenth century Appearance, old, discoloured and worn-out Incomplete at the end.

Of the school of White Yajurveda.

The last colophon in the incomplete manuscript :—

22A, इति केशान्तः— अथ व्रतविसर्गः ।

The MS. breaks off abruptly.

1171

10077. *The Same.*

Substance, country-made paper 9¼×4 inches Folia, 56 Lines, 9 on a page Extent in ślokas, 1120 Character, Nāgara of the eighteenth century Appearance discoloured and old Complete Written in two different hands

The maṅgalācaraṇa and the object of the work —

श्रीन्दसिंहं शिवं नत्वा श्रीमदम्बां सरस्वतीम् ।
गणेशं पितरौ कात्यायनादीन् कर्करेणकौ ।
रामाभिद्दीचपुत्रस्य पुत्रो गङ्गाधराभिधः ।
परोपकृत्यै कुरुते गद्यैः संस्कारपद्धतिम् ॥
तत्र संस्कारक्रमः ॥
गर्भाधानं पुंसवनं सीमन्तोन्नयनं ततः ।
जातकर्माभिधानञ्च निष्क्रमःप्राशनं क्रमात् ॥
चूडोपनयनं वेदव्रतानां च चतुष्टयं ।
गोदानं मेखलोन्मोको विवाहः षोडश क्रियाः ॥
तत्र गर्भाधानं प्रागुच्यते ॥

It ends :—

ग्रन्थान्तराणि संवीक्ष्य यथामति मयोदितम् ।
(?) युक्तायुक्तत्वं च यत्र शोध्यंत सर्पैकैः (?) ॥
यो वात्स्यायनवंशभालतिलको रामोऽभवद् भूतले ।
तत्पुत्रो वसुधा निजेन यशसा दामोदरो मण्डयन् ॥
तत्पुत्रो व्यदधात् हृदय (?) दशसु संस्कारेषु गद्यैरृजु-
विंप्राणामुपकार एव निरतो गङ्गाधरो पद्धतिम् ॥
विप्रकार्य्यार्थिये कृत्वा गद्यैः संस्कारपद्धतिं । ?
यादृशं पुस्तकं दृष्ट्वा तादृशं लिखितं मया ।
यदि शुद्धमशुद्धं वा मम दोषो न दीयते ॥

Then there is a line and a half of writing in a later hand.

1172.

5746A. संस्कारसुबोध । *Saṃskāra-subodha.*

Substance, country-made paper 11 × 5 inches Folia, 69 Lines, 9 on a page Character, Nāgara of the nineteenth century Appearance, fresh Incomplete at the end

Written in two different hands. The second hand begins in the 6th line of leaf 45 and continues to the end.

It gives directions for sacramental rites

Beginning :—

श्रीवरदमूर्त्तिर्जयति ।
गणेशं गिरिजां नत्वा शिवञ्चैव सरस्वती ।
लक्ष्मी नारायणञ्चैव प्रसन्नं गुरुमेव च ॥
पारस्करं तथा रेणुं भाष्यकारांस्तथैव च ।
गर्भाधानादिसंस्कारसुबोधः क्रियते मया ॥
बालानां सुखबोधाय नित्यं सत्कर्म्मदर्पणः ।
संस्कारा द्विविधाः प्रोक्ता ब्राह्मा दैवाश्च नित्यशः ॥
तत्र ब्राह्मा गर्भाधानाद्याः पाकयज्ञीया दैवाः ।
तत्र गर्भाधानाद्या अनुष्ठेयरूपेणोच्यन्ते ॥
ते संस्काराः षोडश :—
गर्भाधानं पुंसवनं सीमन्तो जातकर्म्म च ।
नामक्रिया निष्क्रमोऽन्नप्राशनं वपनक्रिया ॥
कर्णवेधो व्रतादेशो वेदारम्भक्रियाविधिः ।
केशान्तः स्नानमुद्वाहो विवाहाग्निपरिग्रहः ॥
त्रेताग्निसंग्रहश्चैव संस्काराः षोडश स्मृताः ।
नवैताः कर्णवेधान्ता मन्त्रवर्ज्जं क्रियाः स्त्रियः ॥

Last colophon in the incomplete manuscript :—

63B, इति वराहपुराणोक्त ऋतुदर्शनशान्तिविधिः ।
अथास्य शान्तिप्रयोगः ।

1173.

5746B.

Substance, country-made paper 11¾×5 inches Folia 56 Lines, 12 per page Character Nāgara of the nineteenth century Appearance, new Incomplete at the end

A manual for sacramental rites The manuscript breaks off in the middle of the marriage ceremony

I do not think it forms part of Saṃskāra subodha, though that title appears on the reverse of the first leaf, and it says in leaf 12 A :--

इति संस्कारसुबोधे जन्मदिनमारभ्य दशदिनपर्य्यन्तं पूर्व्वरात्रौ सूतिकागृहद्वारसमीपे यथारीत्युक्तानि नानाप्रकारेण कथितानि ॥

Beginning :—

अथ गर्भाधानप्रयोगः । तद्यथा :—

ऋतुप्राप्तदिनात् षोडशरात्रिषु आद्यचतुर्द्दिनामावास्याष्टमी पौर्णिमाचतुर्द्दशीसन्धिसंक्रान्तिव्यतीपातवैधृतिपरिघपूर्व्वार्द्धभद्राश्राद्धतत्पूर्व्वदिनमघामूलरेवत्यश्विनीभरण्यश्लेषाश्रवणधनिष्ठाजन्मतारारहितासु चन्द्रताराऽनुकूलासु समासु रात्रिषु कार्य्यं ।

1174.

5748. संस्कारभास्कर । *Saṃskāra-bhāskara.*

By Ṛsibudha, son of Gaṅgadhara, son of Viśvanātha.

Substance, country-made paper. 12×5 inches Folia, 106 Lines, 9 per page Extent in Ślokas, 2200 Character, Nāgara of the nineteenth century. Appearance, fresh. Complete

It gives directions for the performance of sixteen leading sacraments It is based on the Gṛhya-sūttra of Pāraskara and it consults Harihara, Karka and Vāsudeva

See Lez. No 539.

Colophon —

इति संस्कारभास्कराख्यः प्रयोगः समाप्तः ।

1175

6217 **उत्सर्गोपाकर्म्मविधिः ।** *Utsargopākarma-vidhi*

Part of Prayoga-paddhati by Gaṅgādhara Bhatta.

Substance, country-made paper 9½ × 5¼ inches Folia, 40 Lines, 9 on a page Extent in ślokas, 560 Character, Nāgara of the early nineteenth century Appearance, old and discoloured Complete

Beginning :—

अथोपाकर्म्म लिख्यते ।

प्रारम्भः । ततः गृहे अभ्यङ्गस्नानं देवतार्च्चनं मातृकापूजापूर्व्वकं नान्दीश्राद्धान्तं कृत्वा ... ... ग्रामाद्बहिः शिष्यैरन्यैश्च ब्राह्मणैः सह रम्यजलाशयं गच्छेत् ॥

19B, अथोत्सर्गः ; 39B, इत्युत्सर्गः ।

Last Colophon :—

इति गङ्गाधरविरचितायां प्रयोगपद्धतौ उत्सर्गोपाकर्म्मविधिः समाप्तः ।

Post Colophon —

हस्त अक्षर मल्हार जोसि लोहोगावकर याचे असे । शुभं भवतु । श्रीरामाजय, etc , etc.

1176.

6235B.

Substance, country-made paper. 9 × 5 inches Folia, 47. Lines, 9 on a page. Fol 20-26 are lost and their contents have been restored in fol. marked 20-27 Extent in ślokas, 1000 Character, Nāgara Dated Samvat 1927. Appearance, good

Beginning :—

अथ तीर्थप्रार्थना ॥

त्वं राजा सर्व्वतीर्थानां त्वमेव जगतः पिता ।

याचितं तीर्थं मे देहि सर्व्वपापैः प्रमुच्यते ॥

The prayer takes up the first leaf.

The real work begins in the second.

श्रीगणेशाय नमः ।

अथातो नित्यस्नानम् ।

नद्यादौ मृद्-गोमय-कुशतिलसुमनस आहृत्योदकान्तं गत्वा शुचौ देशे स्थाप्य प्रक्षाल्य पाणिपादं कुशोपग्रहो बद्धशिखो यज्ञोपवीती आचम्य विष्णु० तिथौ छन्दसामुत्सर्गमहं करिष्ये .... एवं गुण० एतत्कालपर्य्यन्त-जन्मप्रभृति बाल्ययौवनवार्द्धकेषु रहसि प्रकाशे वा ज्ञानाज्ञानकृतमनोवाक्काय-कर्म्मकृतानां महापातकानामुपपातकानां गोवधादीनां गुरुतल्प-सुरापान-ऋणा-नपाकरण-पर्णविक्रय-परवेदन-इन्धनार्थद्रुमच्छेदन-गर्भपातन-हिंसामन्त्रविधान-भ्रूण-हत्या-सङ्कलीकरण--मलिनीकरण--अपात्रीकरण--जातिभ्रंशकरण--अयाज्ययाजन-ब्राह्मणवध-स्त्रीवध-बालवध-पशुवध-कृमिकीटादि-जीववध-ब्राह्मणस्त्रीगमन......
... ... (4A) प्रत्यवायपरिहारार्थं अध्यायोत्सर्गोपाकर्म्मनिमित्तं गण-स्नानमहं करिष्ये ।

But actually we have only the mode of utsarga or the recital of the vedas (probably in the month of Śrāvana, as everyone of the first twenty leaves is marked श्रा.) and no upākarma or the closing of the recital. It is for the followers of the Mādhyandina school.

Last Colophon :—

इत्युत्सर्गविधिः । शुभं भवतु । कृष्ण । कृष्ण । कृष्ण ।
(*Kṛsna* repeated five times). बालमुकुन्दस्येदं पुस्तकम् ।
साक्षीत्य । संवत् १९२७ मिति पौषकृष्ण १० ।

1177.

6240. **कुशकण्डिकानिर्णयः ।** *Kuśakaṇdikā-nirṇaya*

For the Mādhyandina School, being a commentary on the chapter of Kuśakandikā of Pāraskara Gṛhya sūtra by Gaṅgādhara

Substance, country made paper 10 × 3½ inches Folia, 7 Lines, 11 on a page Extent in ślokas, 340. Character, modern Nāgara Appearance, fresh Complete

Colophon —

इति गृह्यसूत्रे टीकाविधाने गङ्गाधरविरचिते कुशकण्डिकानिर्णयः ।

There are six lines more, added by the scribe and something more in a second hand

Beginning —

श्रीगणेशाय नमः ।

पारस्करगृह्यसूत्रे कर्कोपाध्यायपादं प्रणम्य व्याख्यास्यामः ।

अथ शब्देन किं कथ्यते ।, etc., etc.

1178.

6317 **स्मार्त्तमार्त्तण्डप्रयोगः ।** *Smārtta-Mārttaṇḍa-prayoga*

Substance, country-made paper 8×5 inches Folia, 60 Lines, 10 on a page Extent in ślokas, 1200 Character, modern Nāgara Appearance fresh Complete

Colophon :—

इति स्मार्त्तमार्त्तण्डप्रयोगः समाप्तः ।

Post Colophon :—

वेदमूर्त्तिमल्हारदीक्षितमुरगोड़वासस्मार्त्तमार्त्तण्डपद्धतिप्रयोगश्चेत सम्पूर्णा ।

कात्यायनसूत्रभारद्वाजसगोत्रोद्भवउगरगोलवासदासेन लिखितम् । शुभम् ।

The author does not give his own name, although he gives that of his guru as Svaprakāśa. It belongs to the school of Kātyāyana but in the Kānva Śākhā

The maṅgalācarana and the object of the work.

शिवात्मजं नमस्कृत्य स्वप्रकाशगुरूनपि ।

करोमि स्मार्त्तमार्त्तण्डं यथा स्मृत्यनुसारतः ॥ (त्यानुसारतं)

Topics :—1A, आदौ दारकाल उच्यते ; 3B, अथ प्रयोगः ; 7B, अथ वैश्वदेवः ; 8B, अथ शिष्टां प्रवक्ष्यामि ; 9B, अथ सायंहोमः, 10A,

अथ प्रातरौपासनम्; 10B, अथ चतुर्थीहोमः; 14A, अथ स्थालीपाकः; 19A, अथ पिण्डपितृयज्ञः; 21B, अथ दर्शस्थालीपाकारम्भः, 31A, इति स्मार्त्तमार्त्तण्डे आधानप्रयोगः समाप्तः—अथ मणिकाधानम्; 31B, अथ प्रायश्चित्तानि लिख्यन्ते।

37B, अथोपाकर्म्म, 38B, एतावानुत्सर्गः ततः प्रयोगः—एवं गुणविशेषणाध्यायोत्सर्गनिमित्तसूत्रोक्तविधिना स्नानमहं करिष्ये, 42B, ततः शान्तिपाठं कुर्य्यात्, 44A, अथ वैकल्पिकावधारणम्, 46B, उत्सर्गोपाकर्म्मकर्म्मणि अनाज्ञातन्यूनातिरिक्तानादिष्टप्रायश्चित्तब्रह्मणा होष्ये; 47A, उदात्तादिस्वराः प्रदर्शनीयाः; 48A, ब्राह्मणारम्भः (gives pratīkas of various Brāhmanas) 48A, इत्येकपात्काण्डे, इति हविर्यज्ञकाण्डे, 48B, इत्यध्वरकाण्डे चतुर्थः, इति ग्रहकाण्डे पञ्चमः, इति वाजपेयकाण्डे षष्ठः, 49A, इति राजसूयकाण्डे सप्तमः, इत्युखासम्भरणकाण्डमष्टमम्; इति हस्तिघटकाण्डं नवमम्, 49B, इति चित्काण्डं दशमं; इति सावित्रि(?)काण्डमेकादशं; इत्यग्निरहस्यकाण्डं द्वादशं, इत्यष्टाध्यायिकाण्डं त्रयोदशं; 50A, इति मध्यमकाण्डं चतुर्दशं; इत्यश्वमेधकाण्डं पञ्चदशं; इति प्रवर्ग्यकाण्डे षोडशं, 50B, इति बृहदारण्ये सप्तदशं इति दश ग्रन्थाः; 51A, इति स्मार्त्तमार्त्तण्डे उपाकर्म्म पद्धतिः समाप्ता।

51A, अथ नवान्नप्राशनम्; 51B, अथ वैकल्पिकावधारणम्; 54A, इति स्मार्त्तमार्त्तण्डनवान्नप्राशनपद्धतिः समाप्ता अथोत्तरकर्म्म।

End:—गृहस्थकाण्डे।

नावसथ्यात् परो धर्म्मो नावसथ्यात् परं तपः।
नावसथ्यात् परं दानं नावसथ्यात् परं धनम्॥
नावसथ्यात् परं श्रेयो नावसथ्यात् परं यशः।
नावसथ्यात् परा सिद्धिर्नावसथ्यात् परा मतिः॥
नावसथ्यात् परं स्नानं नावसथ्यात् परं व्रतम्॥

The authorities :—

1A, हरिहरभाष्ये; भर्तृयज्ञभाष्ये, वासुदेवभाष्ये, जयरामस्तु, 2A, याज्ञवल्क्यः; 2A, आश्वलायन आपस्तम्ब हिरण्यकेशी बौधायन भर्तृयज्ञ मिश्रगदाधर इत्यादयः; 3A, यज्ञपार्श्वे, 9A, गदाधरभाष्ये, 24A, कारिकायां।

1179.

6219 **प्रयोगदीपिका (कर्कानुसारिणी) ।** *Prayoga-dīpikā.*

Two Parts

I.—Substance, country-made paper 12×5 inches Folia, 8 Lines, 11 on a page Character, modern Nāgara Dated Samvat 1933 Appearance, fresh.

Colophon :—

इति प्रयोगदीपिकायां जातकर्म्मादिचूडाकरणान्तानां समान-तन्त्रेण कर्कादिमतानुसारेण प्रयोगः समाप्तः ।

Then there are four lines, prescribing a silent (that is without uttering Mantras) performance of those sacraments for a daughter

The date at the end of the 5th line .—

सम्वत् १९३३ ।

Beginning —

श्रीगणेशाय नमः । यदि जातकर्म्मादीनि स्वकाले न कृतानि स्युः कालातिक्रान्तिनिमित्तं प्रायश्चित्तं कृत्वा कार्य्याणि ।

एतेष्वेकैकलोपेपि पादकृच्छ्रं प्रकीर्त्तितम् ।

चूडायामर्द्धकृच्छ्रं स्यादापदीत्येवमीरितम् ॥

II.—Substance, etc , the same as in the first description Both the parts written by one and the same hand Folia 12

Colophon —

इति श्रीप्रयोगदीपिकायां कर्काद्यनुसारी उपनयनादिसमा-वर्त्तनान्तप्रयोगः ।

Beginning :—

अथ उपनयनप्रयोगः ।

कर्त्ता उपनयनदिनात् पूर्व्वेद्युः नित्यक्रियां निर्वर्त्त्य स्वस्योपनयने कर्त्तृत्वाधिकारसिद्धये कृच्छ्रत्रयं गोदानादिद्वारा कृत्वा द्वादशसहस्रं गायत्री द्वादशाधिकसहस्रं गायत्री वा जपित्वा कुमारेण कामचार-

कामवाद-कामभक्षणादि-दोषापनोदनार्थं प्राजापत्यत्रयं कारयित्वा ...
.........स्वस्तिवाचनं ग्रहयज्ञश्च कुर्य्यात् ॥

1180.

10057. **विवाहपद्धतिः ।** *Vivāha-paddhati*

By Rāma Datta

Substance country-made paper 8×6 inches Folia, 8 Lines, 14 on a page. Extent in ślokas, 130 Character, Nāgara of the nineteenth century Appearance, discoloured Incomplete

Beginning —

अथ विवाहरामदत्तकृतपद्धति लिख्यते ।
संध[धि]विग्रहमन्त्रीन्द्रदेवादित्यतनूद्भवः
भूमिपालशिरोरत्नरञ्जिताङ्घ्रिसरोरुहः ॥
सान्धिविग्रहिकः श्रीमान् वीरेश्वरसहोदरः ।
महामन्त्रकरः श्रीमान् विराजति गणेश्वरः ॥
श्रीमता रामदत्तेन मन्त्रिणा तस्य सूनुना ।
पद्धतिः (पद्धिति) [क्रि]यते धर्म्मेण रम्या वाजसनेयिनां ॥

1181.

6216. **विवाहपद्धतिः ।** *Vivāha-paddhati.*

Being an extract from Gṛhya-candrikā by Jagadrāma Dvivedi.

Substance, country-made paper 9¾×5½ inches Folia, 11 Lines, 9, 10 on a page Extent in ślokas, 200 Character Nāgara Date, Samvat 1857 Appearance, old and discoloured Complete

Colophon :—

इति श्रीमद्द्विवेदहरेश्वरात्मजश्रीजगद्रामकृते गृह्यचन्द्रिकाख्ये ग्रन्थे विवा[ह] पद्धतिः ।

Post Colophon :—

सं १८५७ ज्येष्ठकृष्ण ३ चन्द्रवार । शुभं । श्रीशिवपार्व्वती ।

Beginning :—

पुत्रविवाहनिमित्तमातृपूजापूर्व्वकं नांदीमुखं श्राद्धं विधाय विवाह्यं पुत्रं मङ्गलतूर्य्यवेदघोषेण कन्यापितृगृहमानयति । etc., etc.

The Gṛhya sūttra on which the Paddhati is based is apparently of Kātyāyana.

1182.

10402 **विवाहपद्धति ।** *Vivāha-paddhati.*

According to the rules of Kātyāyana.

By Rudradhara

Substance, foolscap paper 7×5 inches Folia, 19 Lines, 12 on a page, Extent in ślokas, 300 Character, Nāgara Date, Samvat 1909 Appearance, discoloured Complete.

Colophon —

इति कात्यायनमतानुसारेण रुद्रधरकृता विवाहपद्धतिः समाप्ता ।

Post Colophon :—

संवत् १९०९ सके १७७४ फाल्गुन वद्य ६ बुधे भागानगरे अजादित्यौतेन लिखितं ।

अथ सप्तपदीश्लोकानि (Seven ślokas containing the oaths of the bride).

Beginning :—

यजुर्वेदोक्तगौड़विवाहो लिख्यते ॥ देशकालौ स्मृत्वा च कन्यार्थिने गृहागताय अस्मै स्नातकाय वराय कन्यादानाङ्गभूतं मधुपर्कं करिष्ये ॥, etc., etc.

1183.

6280. **आवसथ्याधान ।** *Āvasathyādhāna*

Substance, country-made paper 10½×4 inches. Folia, 42 Lines, 10 on a page Character, modern Nāgara Appearance, discoloured Incomplete at the end

An exposition of *Āvasathyādhyāna*, as directed by Kātyāyana. It often quotes Renu as in 8A and Harihara as in 11A

Beginning :—

श्रीगणेशाय नमः ।

एकं नमामि कमलापतिमेव सद्यः

सर्व्वांतरायगणमूलविनाशनाय ।

संस्कारसंस्कृततनोरतिसन्निकृष्टं

तद्धीनदीर्घतपसोऽप्यतिविप्रकृष्टम् ॥

अथावसथ्याधानम् तत्साध्यानि कर्म्माणि च कात्यायनानुसारेण लिख्यन्ते । तत्राङ्गहीनस्यासमर्थत्वादश्रोत्रियस्यावैद्यत्वात् शठस्याशुचित्वाच्छूद्रस्याप्यवैदिकत्वात् अङ्गहीनाश्रोत्रियशठशूद्रवर्ज्जितब्राह्मणराजन्यवैश्यानुलोमजारथकाराणां स्त्रीणाञ्चाधिकारः ।

The occasions of the rite.

7B, आवसथ्याधानं दारकाले दायाद्यकाल एकेषां । दारशब्देन पाणिग्रहणादिसंस्कारसंस्कृतं स्त्रीद्रव्यमभिधीयते तत्कालस्तत्सम्बन्धिकालस्तदिष्टिकाल इति यावत् ... .

8A, दायाद्यकाल एकेषां दायं पैतृकधनं तस्य विभागादिना स्वीयत्वेनाद्यः कालस्तस्मिन् काले आवसथ्याधानं कर्त्तव्यमित्येकेषामाचार्य्याणां मतम । एवञ्चाच पारस्करकल्पानां माध्यंदिनादीनां अविभक्तदायादरहितानां दारकालेऽविभक्तदायादवताञ्च तेषां दायाद्यकाल एव आधानं भवतीति व्यवस्थितविकल्प इति ।

21B, इति कुण्डकरणविधिः । अथ साधारणो विधिरुच्यते । तत्र पारस्करः ।

परिसमूह्योपलिप्य त्रिरुल्लिख्योद्धृत्याभ्युक्ष्य अग्निमुपसमाधायेति परिसमूहनं पांसूनामपसारणं ... ...

It ends abruptly.

1184.

6284. **स्मार्त्ताधानप्रयोगः** *Smārttadhānaprayoga*

According to Karka—(White Yajurveda).

Substance, country-made paper. 9½ × 4½ inches Folia 34 Lines, 9-11 on a page Character modern Nāgara Appearance, old and worm-eaten Incomplete at the end

A modern tract quoting Gaṅgādhara.

The mangalācarana and the object.—

श्रीगणेशाय नमः ।

नत्वा गुरुं गणेशञ्च कातीयसूत्रसम्मतः (सम्मं ततः) ।

स्मार्त्ताधानप्रयोगोऽयं तन्यते बालहेतवे ॥

कर्कमतानुसारेण सूत्रोक्तः स्मार्त्ताधानप्रयोगो लिख्यते ।

Then it goes on —

कालनिर्णयो(य) गङ्गाधरियद्धतौ ।

अग्न्याधानं द्विजेन्द्राणां स्यात् कृत्तिकाविशाखयोः ।

रेवती रोहिणीपुष्यमृगज्येष्ठोत्तराचये ॥

4A, इति चरुसुद्धिः, 9A, इत्यावसथ्याधानम्, 9B, इति मणिकावधानम्, 13A, इति पञ्चमहायज्ञाः, 13B, इति निरग्नेर्वैश्वदेवः, 14A, अथ सायंप्रातर्होमः, 16B, इति होमनिर्णयः, अथ पुनराधानम्, 20A, अथ दर्शे पिण्डपितृयज्ञः; 22B, अथ नवान्नप्राशनम्, 28A, अथ श्रवणाकर्म्म 31A, अथेन्द्रयज्ञ उच्यते, 32A, अथ एषातकाकर्म्म उच्यते, 34A, अथ रारोहणमुच्यते ।

It ends abruptly.

1185.

987. **यजुर्वल्लभा** *Yajurvallabhā on* **आह्निकपद्धति ।**

By Viṭhala Dīkṣita.

For the manuscript, see L 2061 and for the work Alwar ext. 294

Rājendralāla is wrong in thinking that Yajurvallabhā is a part of Āhnikapaddhati It is named Yajurvallabhā,

because it is intended for the priests of the Yajurvedī School. Āhnika is one of the subjects, out of three, treated of in the three chapters of Yajurvallabhā.

Post Colophon Statement.—

शुभमस्तु सर्व्वजगतां परहितनिरता भवन्तु भूतगणाः ।
दोषाः प्रयान्तु शान्तिं सर्व्वत्र सुखी[सुखिनो]भवन्तु लोकाः ॥

यादृशं पुस्तकं दृष्टं इत्यादि ।

संवत् १८९१ मिति फाल्गुन वद्य १२ द्वादश्यां मन्दवासरे लिखितं पुस्तकं शिवप्रसादेन स्वार्थं परार्थं च । शुभमस्तु लेखकपाठककर्त्तृणां ॥

1186.

1647 यजुर्व्वल्लभा । *Yajurvallabhā*

By Kesavajit, son of Bisvanāth Bhatta.

Substance, country-made paper 10 × 4⅞ inches Folia, 88. Lines on a page 14, 15, 16 Extent in ślokas 2800 Character, modern Nāgara

Last Colophon —

इति श्रीविद्वद्वरभट्टश्रीविश्वनाथात्मजेन, भट्टकेशवजिता संग्रहीतायां यजुर्व्वल्लभाख्यायां कर्म्मसरणौ आह्निककाण्डः ।

This work is based on the above

In the obverse of the first leaf there is a table of contents of this book :—

१ । यजुर्व्वल्लभानुक्रमणिका, तत्र परिभाषा, आचारप्रशंसा, अङ्गनियमः, दिङ्नियमः, प्राचीनिर्णयः, उपवेशनादिविचारः, उपवीतशिखादिबन्धनं, कर्म्मादिज्ञानं ।

२ । आदौ प्रणवोच्चारः, शौचोपाकर्म्मकरणनिषे[धः], तल्लक्षणं च, जलस्पर्शविधिः, तैलयन्त्रशब्दकर्म्मनिषेधः, स्नानादौ संकल्पाकरणे, कर्म्मणो ब्रह्मार्पणत्वं, ईश्वरार्पणत्वं च, तल्लक्षणे च, यद्देवैरनुष्ठितं तन्मनुष्यैर्नानुष्ठेयं, उपवासे कर्म्मनियमः, इत्यादिभक्षणोत्तरमपि स्नानसन्ध्यादिकार्य्यमिति परिभाषा, अथ प्रबोधकालः,

ब्राह्मे मुहूर्त्ते उत्थाय ईश्वरचिन्तनं, ब्राह्ममुहूर्त्तलक्षणं, रात्रेः पश्चिमे यामे वेदाध्ययनम्, तत्र निद्रायां प्रायश्चित्तं, ब्राह्मे मुहूर्त्ते कर्त्तव्यमाह, स्मरणीयान्यपि,

३। भूमि प्रार्थना, प्रातर्मङ्गलद्रव्यदर्शनम्, अदर्शनीयान्यपि, तिथिविशेषे दर्पणादर्शनानिषे[ध] इति प्रबोधविधिः।

The manuscript is full of marginal notes in the first two pages.

1187.

6505. प्रयोगसंग्रहः। *Prayoga-saṃgraha.*

By Paraśurāma Pāṭhaka.

Substance, country-made paper 11×5 inches Folia, 148 Lines, 9 on a page Extent in ślokas, 2800 Character, modern Nāgara Appearance, fresh Complete Every leaf is marked आह्निक।

The daily duties of a Brāhmaṇa of the school of Kātyāyana, composed in Saṃvat 1851

It ends :—

नृपात्यष्टिशके Śaka 1616 पौष शुक्ले दिग्बुधवासरे।
प्रयोगसंग्रहः काश्यां कृतः शङ्करप्रीतये॥
अष्टादशशतोत्तर एकं पञ्चाशत्संख्याके (?)
श्रीधननामसंवत्सरे पौषशुक्लदशम्यां प्रयोगसंग्रहरचनं समाप्तम्।

It gives the names of the author's friends who helped and patronised him in this work

अथ ग्रन्थस्य करणे उपयोगप्रेरणकर्त्तार उच्यन्ते।

दादंभट्टः कुहाडग्रामस्थः। नारायणभट्टो धर्म्माधिकारी।
महाजनोपनामजीवनरामो मंगक [जीवनरामसंज्ञकः] वेटया
[म]स्थः॥ ६॥

ग्रन्थसहायकर्त्ता यत्किञ्चित् महादेवभट्टब्रह्मचारी देवलग्रामस्थः॥ ४॥ पद्माकरदीक्षिताः नासिकक्षेत्रस्थाः॥ ५॥ अथ लेखनद्वारा सहायकर्त्तारः काले इत्युपनामकत्र्यम्बकभट्टाः॥ १॥ ज्ञानी इत्युपनामकउत्तमश्लोकाख्यः॥ २॥ नारायणभट्टो धर्म्माधिकारी॥ ३॥ कावले इत्युपनामक सदा ... ...

Here ends the last leaf, 184A. The B. side is left blank.

12B, इति प्रयोगसंग्रहे परशुरामपाठकक्कते (त) प्रयोगपारिजात-पराशर-माधव-नृसिंहाह्निक-धर्मप्रवृत्ति-आचारमयूख-आचारादर्शाद्यनुसारी प्रबोधकादिशौचविधिः।

38B, इति श्रीमच्छङ्कराचार्यभगवतः कृतौ गायत्रीभाष्यं सम्पूर्णम्। अथ तैत्तिरीयश्रुतौ नारायणोपनिषदि विहितत्रिकालसन्ध्योपासनमन्त्राणां विद्यारण्यस्वामिमाधवकृतं भाष्यं लिख्यते। माध्याह्निकसन्ध्यानुष्ठाने अभिमन्त्रितजलपानार्थं मन्त्रमाह आपः पुनन्तु, etc , etc., etc 39B, इति नारायणीये चतुर्विंशोऽनुवाकः, 40B, इति नारायणीये षड्विंशोऽनुवाकः, 41B, इति तैत्तिरीयश्रुतौ सन्ध्योपासनमन्त्रभाष्यं समाप्तम्, 60B, इति कात्यायनत्रिकण्डिका सूत्रं समाप्तम्, 80A, इति श्रीश्रौतस्मार्त्तानुष्ठानपारगजीवनरामद्विवेदी तस्य शिष्येण कृतौ स्मृकल्पद्रुमहरिहरस्नानदीपिकाद्यनुसारी ब्रह्मयज्ञतर्पणप्रयोगः समाप्तः। अथ संक्षेपतर्पणम्; अथ भीष्मतर्पणम्, 80B, अथ वैश्वदेवः, etc., etc. ... 92B, अथ भोजनविधिः, etc., etc., ... 120A, अथ सायंसन्ध्योपासनाप्रयोगः।

1188.

6250 (*a*) **नित्यस्नानपद्धतिः** *Nitya Snānapaddhati.*

As directed in the Trikāṇḍa sūtra of Kātyāyan.

By Kahundeva, son of Dvivedi Guṇadeva.

(*b*) ऋषिस्थापनपूजनप्रकारः

By the same author, corrected later by his son, Kṛṣṇadeva in Saṃ. 1820

Substance, country-made paper 9¼×5 inches Folia, 1-9 (of which fol 2-6 are wanting)+1-27, but there is no break between the first and the second pagination They are differently paged, being written by two different hands Lines, 11 on a page Character, Nāgara Dated, Samvat 1931 Appearance, fresh, but mouse-eaten

A. Ends in 11B.

Colophon :—

इति श्रीद्विवेदिगुणदेवात्मजवेदशास्त्रविद्द्विवेदिकाहुदेवविरचिता त्रिकण्डिकासूत्रोक्तनित्यस्नानपद्धतिः समाप्ता।

Beginning —

श्रीगणेशाय नमः ।

कृष्णमूर्त्तिपदद्वन्द्वं निधाय हृदि मङ्गलम् ।

स्फुटं स्नानप्रयोगोऽयं यथामति वितन्यते ॥

तत्र उत्सर्गकालो निर्णीयते ।

अत्र गृह्यसूत्रम् । पौषस्य रोहिण्यां मध्यमायां वाष्टकाया अध्यायानुत्सृजेयु-
रुदकान्तं गत्वेति सूत्रार्थः ।

B. *Colophon* :—

सूत्रकारिकयोर्भाष्यं विलोक्य पद्धतिः कृता ।

कर्म्मठानां प्रबोधाय काह्नदेवद्विजन्मना ॥

खनेत्रवसु भूवर्षे (S 1820) माधवे जाह्नवीतिथौ ।

त्रैविद्यमोढसंज्ञेन काशीपुरनिवासिना ॥

काह्नदेवात्मजेनैषा कृष्णदेवेन धीमता ।

काह्नदेवकृतिः साध्वी शोधिता विदुषां मुदे ॥

समाप्ता

Post Colophon :—

संवत् १९३१ ।

1189.

10359. **स्नानसूत्रपद्धति ।** *Snāna Sūtrapaddhati.*

By the son of Trimalla.

Substance, country-made paper 10×4 inches Foll. marked 8-13 and 18-27 Lines 10, 11 on a page Character, Nāgara of the early eighteenth century. Appearance, old and discoloured Fragmentary

Colophon :—

18B, इति ज्योतिर्विदाराध्यत्रिमल्लसुतनिर्म्मितसन्ध्यादिरूपो द्वितीयः परिच्छेदः, 27B, इति ज्योतिर्विदाराध्यत्रिमल्लसुत-निर्म्मिते तर्पणाख्यस्तृतीयोऽयं परिच्छेदः ।

On the obverse of the 8th leaf :—

त्रिमल्लकृतस्नानसूत्रपद्धतिः ।

1190.

6092 पर्व्वनिर्णय । *Parva-nirṇaya*

By Gaṇapati Rāvala

Substance, country-made paper 11 × 5 inches Folia 11 Lines, 12 on a page Extent in ślokas 400 Character Nāgara Appearance discoloured Complete

Colophon·—

इति श्रीमदग्निहोत्रचातुर्म्मास्यादियजनसमासादितपुरुषार्थ-सार्थश्रीरावलहरिशङ्करसूरिसूनुगणपतिरावलकृतोऽयं पर्व्वनिर्णयः सम्पूर्णः ।

The date of the composition of the work — Sam. 1742.

नेत्राम्भोधिधराधरर्त्तितिमिते । श्रीविक्रमार्के शके
१७४२ मासीषे विजयातिथौ रविदिने मौल्ये च दुर्गाचले ।
योगे पर्व्वविनिर्णयं गणपतिः श्रीरावलाख्यो मुदा
नानाग्रन्थविलोकनादिमलधीरेनं समापूरयेत् ॥

The maṅgalācarana and the object of the work .—

श्रीशिवं सद्गुरुं नत्वा कर्कगर्गादियाज्ञिकान् ।
दर्शे च पौर्णमासे च यागकालो निरूप्यते ॥

The works consulted by the author are —

चयुक्तश्रुतिसूत्रभाष्यनिचयं श्रीकर्कदेवोदितान्
श्रीतन्ताभिधरामयाज्ञिकमतांस्तान् पर्व्वणोनिर्णयान् ।
श्रीगङ्गाधरनिर्मितं हरिहरं रेणुं तथा मण्डनं
श्रीकात्यायनयज्ञपार्श्वसहितं कर्मप्रदीपं तथा ॥
हेमाद्रिप्रथितांश्च माधवमतं स्मृत्यर्थसारामृतं
रत्नं श्रीमदनस्य निर्णयमहासिन्धुं तथा भास्करम् ।
तत्त्वं कालविवेचनं स्मृतिगणान् श्रीकौस्तुभं ज्योतिषां
सिद्धान्तस्मृतिचन्द्रिकादिनिखिलग्रन्थान् विचार्यादरात् ॥
श्रुतिसूत्रस्मृतिभाष्य-प्राचीननिबन्धसागरानेतान् ।
गणपतिरावलविदुषा निर्मथ्यैषां धीयते सारः ॥

The author and his parentage —

औदीच्यद्विजपुङ्गवेषु महितः श्रीरामदासोऽभवत्
राज्ञो वीरमनोहरार्पितपदो यो याज्ञिकः कीर्त्तिमान् ।
तत्पुत्रो हरिशङ्करोऽध्वरकृती श्रीरावलख्यातिभृत्
तत्सूनुर्यजुषां स्थितिर्गणपतिर्ब्रूते ह्ययं पर्व्वणः ॥

Then it goes on :—

पर्व्वण्यखण्डे स कथं विधेयः
खण्डेऽथवा पिण्डयजिः कदा स्यात् ।
एकानुमत्योः सकलं तदेतद्
विचार्य्य वक्ष्ये सुगमैर्वचोभिः ॥

1191.

6314 पर्व्वनिर्णयसिद्धान्तोद्धार (साग्निकानां वाजसनेयिनां)। *Parva-nirnaya siddhāntoddhāra.*

Substance, country-made paper 12×6 inches Folia, 3 Lines, 10 on a page. Extent in slokas, 75 Character, Nāgara Copied in Samvat 1941. Appearance, fresh Complete

Colophon —

इति साग्निकानां वाजसनेयिनां पर्व्वनिर्णयसिद्धान्तोद्धारः ।

Post Colophon :—

शुभमस्तु । संवत् १९४१ मीर भा० व० वार बुध पोथी पंडितबालमुकुन्दस्येदम् ।

Beginning .—

श्रीगणेशाय नमः । ॐ । अथाहिताग्नीनां वाजसनेयिनां उपयोगी पर्व्व निर्णय उच्यते ।

तत्र पर्व्वप्रतिपदोः संपूर्णत्वे संदेह एव नास्ति । खण्डत्वे तु तत्रोपवासयागयो-र्निर्णय उपयुज्यते इति तथाह लौगाक्षिः ।

पूर्व्वाह्ने वाथ मध्याह्ने यदि पर्व्व समाप्यते । उपोष्य तत्र पूर्व्वेद्युस्तदहर्याग इष्यते ॥, etc., etc.

It ends:—

अधिकविस्तरस्तु पर्व्वनिर्णयेऽनुसन्धेयम् इति शिवम् ।

1192.

6225. **सर्व्वकर्मसाधारणाङ्गपद्धतिः ।** *Sarva-karma-sādhāraṇanga-paddhatiḥ*

(Mādhyandinīya).

By Hari Bhaṭṭa, son of Koṇḍena Bhaṭṭa, son of Viśvanātha.

Substance, country-made paper 10×5 inches Folia, 25 Lines, 10 on a page Extent in ślokas, 500 Character, Nāgara by a modern hand Appearance, fresh Complete

Colophon —

इति श्रीमन्महायाज्ञिकदेवज्ञीयमन्युवंशसम्भूतसमस्तख्यातविश्वनाथसूनुकोण्डेनभट्टात्मजनरहरिभट्टकृतसर्व्वकर्मसाधारणाङ्गपद्धतिः समाप्ता ।

Then there are seventeen lines under the heading of—
अथ पत्नीवामदक्षिणविषयः ।

Beginning :—

अथ माध्यंदिनीयानुसारेण सर्व्वकर्मसाधारणाङ्गानां पद्धतिः ।

1193

10504 **वैश्वदेवनिर्णयः ।** *Vaisvadeva-nirṇayaḥ*

By Kāmadeva, the disciple of Anantadeva.

Substance, country-made paper $9\frac{3}{4}\times4\frac{1}{4}$ inches. Folia, 13 Lines, 8 on a page Extent in ślokas, 208 Character, Nāgara Date, Samvat 1716. Appearance, discoloured Complete.

Colophon :—

इति श्रीमदनन्तदेवशिष्यकामदेवेन कृतोयं वैश्वदेवनिर्णयः समाप्तः ॥

Post Colophon :—

संवत् १७१६ वर्षे फाल्गुनमासे शुक्लपक्षे एकादश्यां पुण्यतिथौ शनिवासरे वाराणस्यां लेखक उपाध्याय उद्धवेन लिखितोयं ग्रन्थः॥ शुभं भवतु, etc , etc

In a later hand :—

श्रीअद्येह वाराणसीस्थमोढज्ञातीयत्रै[वि]द्य उपाध्यायशिव-शङ्करस्येदं पुस्तकम्

In another hand :—

इदं पुस्तकं द्विवेदिप्रद्युम्नदेवात्मज-द्विवेदिचन्द्रदेवात्मज-द्विवेदि-सूर्य्यदेवेन मौलेन गृहीतं॥ श्रीरामजयती।

Beginning :—

अथातः पञ्चमहायज्ञा इति विहितपञ्चमहायज्ञेषु अयं संशयः॥ किं कृतस्मार्त्ताधानः सन् यः पृथक् पाकोपजीवी स तत्राधिकारी उत सर्व्वोपि कृतस्मार्त्ताधान इति॥ अत्र पञ्च-महायज्ञा इत्युक्तत्वात् पञ्चानामपि विचारविषयत्वमिति न मन्तव्यं॥ किन्तु एतत् सूत्रोक्तानां चतुर्णामेव। न सूत्रान्तरोक्त-ब्रह्मयज्ञस्य॥ तस्याग्निसाध्यत्वाभावान्नित्यस्नानसूत्रे उपविश्येद्दर्भेषु दर्भपाणिः स्वाध्यायञ्च यथाशक्त्यादावारभ्य वेदमित्यविशेषण सर्व्वान् प्रति विधानाच्च। तत्र सर्व्वेषामधिकारसिद्धेः। पञ्चेतिग्रहणन्तु सर्व्वत्र सूत्रानुकरणमित्यदोषः॥ एवं वक्ष्यमाणवैश्वदेवशब्दादपि न पितृयज्ञान्तानां त्रयाणां बोद्धव्यं॥ किन्तु नृयज्ञान्तानां चतुर्णामेव। तावतामप्यग्निसाध्यत्वादविच्छिन्नसाहित्यत्वाद्ब्रह्मयज्ञस्येव पृथग्विध्य-न्तराभावाच्च॥

तत्र भ्रातॄणामविभक्तानां पृथक् पाको भवेद् यदि।
वैश्वदेवादिकं श्राद्धं कुर्य्युस्ते वै पृथक् पृथक्॥

इति संग्रहवचनात् कृताधानस्य पृथक्पाकोपजीवित्वे सत्येव अधिकार इति प्राप्ते अभिधीयते सत्यं। यदीदं वचनं साग्नि-

कानग्निकसाधारणविषयं स्यात्तदेवमेवं स्यात् ॥ इदन्तु निरग्निक-
विषयमेव ॥ तथाहि ॥ कृतावसथ्याधानस्य आधानान्तरं अवश्य-
मग्निमाधाय पाकयज्ञैश्च संयजेदिति वचनात् ॥ सायंप्रातर्होमा-
दिषु नित्यपाकयज्ञेषु यथाधिकारः प्राप्तः तथा पञ्चमहायज्ञानां
पाकयज्ञत्वाविशेषादहरहः स्वाहा कुर्य्यादन्नाभावे केनचिदाकाष्ठा-
द्देवेभ्यः पितृभ्यो मनुष्येभ्यश्चोदपात्रादिति वीप्सया पुनर्नित्यत्वाव-
गमाच्च तत्राधिकारः प्राप्तः श्रौताधानिनः अग्निहोत्रादिष्विव ॥

3B, क्रतुसंख्यापरिशिष्टे ॥ अथ पाकयज्ञसंस्था होमः पार्वणस्थालीपाका-
वाग्रयणस्थालीपाक एकाष्टका पितृदेवतं बलिरेव सप्तम इति। अस्यायमर्थः।
होमस्तावत् सायंप्रातःकर्त्तव्यत्वेन विहितः प्रयोगद्वयरूप एकः पाकयज्ञः। पार्वण-
स्थालीपाकौ दर्शपूर्णमासप्रतिपद्विहितौ द्वौ पृथक् पृथक्। आग्रयणस्थालीपाकः
शरद्वसन्तयोर्विहितौ द्वौ मिलित्वा एकः। श्यामाकचरुपक्षे त्रिरेकः। एकाष्टका
चतसृभिर्मिलिताभिरेका एव। पितृदेवतं पार्वणश्राद्धं। बलिः पञ्च महायज्ञाः ॥
एवकारो मिलितानामेव एकत्वज्ञापनार्थः ॥ एवं च सति पञ्चभिर्मिलितैरेवैकः ॥
स च सप्तमः पाकयज्ञो भवति। अत्र बलिशब्देन पञ्चमहायज्ञानुष्ठानं लक्ष्यते।
नित्यत्वाद्बलिदानसाहचर्य्याच्च ॥ तथाच ॥

वैश्वदेवे तु निर्वृत्ते यद्यन्योऽतिथिराव्रजेत्।
तस्मा अन्नं यथाशक्ति प्रदद्यान्न बलिं हरेत् ॥

इति मिताक्षरास्थवचनस्य बलीतिपदं वैश्वदेवपरं व्याख्यातं न्यायविद्भिः ॥

So Vaiśvadeva vali is one of the seven Pākayajñas and constitutes offerings to the gods, manes, guests and animals and (the recitation of the Vedas ?) Brahmayajña.

It ends —

कांस्यभोजनन्यायेन अग्निमतः पाकोपजीवित्वं निरग्नेरित्यलं
विस्तरेण ॥

श्रीमदनन्तदेवानां गुरूणां सुप्रसादतः।
कृतोयं कामदेवेन वैश्वदेवविनिर्णयः ॥

1194.

6127. **और्द्धदेहिकपद्धति ।** *Aurddhvadehika-paddhati.*

By Viśvanatha, son of Gāvāla

Substance, country-made paper 12×5 inches Folia, 59 Lines, 11 on a page. Extent in ślokas, 1900 Character, Nāgara Date, Samvat 1934 Appearance, fresh. Complete

Portions of the 46th and the 47th leaves are written in a different hand.

Colophon —

इति श्रीमद्गोमतीवालज्ञाय (?) ज्योतिर्विद्गावालात्मजविश्व-
नाथकृते और्द्ध (ऊर्द्ध)देहिकपद्धतिः सम्पूर्णा ।

Post Colophon Statement:—

संवत् १९३४ मिति माघसुदि ४ वार शनिवारे। १९००

The maṅgalācaraṇa and the object of the work :—

श्रीगणेशो जयतु ॐ इष्टदेवताभ्योः नमः ।
गणेशं गिरां पद्मनाभं सुरेशं
विभुं विश्वनाथं विशालाचि(?) माद्यं ।
विरिञ्चिं विवस्वन्तमन्यांश्च नत्वा
क्रियापद्धतिं विश्वनाथः करोति ॥
वस्वर्थां श्रुतिसम्मताञ्च सरलां कर्त्तव्यमार्गप्रदाम्
नानाग्रन्थविलोड़नात् सुरचितां प्रेतत्वमुक्तिप्रदाम् ।
शिष्याणां सुखहेतवे च विदुषां चित्तप्रसादप्रदां
गुर्व्विष्टस्य प्रसादजाञ्च सुधिया सर्व्वार्थदामादृताम् ॥
ये चैत्वाग्निमतः(?) प्रवासनिरताः स्वस्थाश्च गेहे च ये
ये चानग्निमतोऽथवाग्निरहिता ये ब्रह्मचर्य्ये स्थिताः ।
तेषां चान्यतमस्य पूर्व्वमपराब्दान्ताः समग्राः क्रिया
उक्ताप्यत्र मया क्रमेण निरता दुर्म्मार्गगाणामपि ॥

सधवानामपि विधवानां सर्व्वयोषितां, बालानामपि वृद्धाना-मनाश्रमगता[ना]मपि, ततो यजुर्वेदान्तर्गतमाध्यन्दिनीशाखोक्त-मरणसमयादारभ्य सपिण्डीकरणान्तं कर्म्म लिख्यते ।

End :— यथा-शाखं स्वस्त्ययनं वाचयित्वा अग्निखो गृहीत्वा बन्धुभिः सह भुञ्जीत । अत ऊर्द्धं श्रीखण्डधारणं ताम्बूलभक्षणानि कुर्य्यात् ।

1195.

5774. **कात्यायन श्राद्धकल्प ।** *Kātyāyana śrāddha kalpa.*

By Hemādri.

Substance, country-made paper 10×4 inches Folia, 54 Lines, 9 on a page. Extent in ślokas, 1100 The last leaf has been newly restored Appearance, old and discoloured. Complete Character, Nāgara of the eighteenth century.

Beginning :—

यत् पादपङ्केरुहपांसुपूते
दत्तैर्गयामूर्द्धनि शक्तुपिण्डैः ।
मुक्तिं महापातकिनो लभन्ते
गदाधरं तं शरणं प्रपद्ये ॥
प्रणेता शास्त्राणां सपदि सुहृदासन्नमयिता
क्रतूनामाहर्त्ता समरभुवि जेता क्षितिभृतां ।
विनेता साधूनामभिलषितदाता गुणवतां
मनीषी हेमाद्रिर्जयति जगतीभूषणमणिः ॥
अयाचयापाकरणातिरिक्तै मुंदां निदानैरपि यस्य दानैः ।
देवादयः प्रत्युत धारयन्ते चिन्तामनन्तामधमर्णतायां ॥
स्रजतः सततं दिगङ्गनानां
श्रवणाभोगविभूषणं यशः
चरितं कथमस्य कथ्यते
जगती जङ्गमकल्पशाखिनः ॥

निखिल(?) चित्रान्यखिलस्मृतिभ्यः
कृत्यानि कात्यायनसम्मतानि ।
निबध्यते श्राद्धविधिः क्रमेण
हेमाद्रिणा श्रीकरणाधिपेन ॥
यश्चकार चतुर्वर्गचिन्तामणिमनन्यधीः ।
हेमाद्रिसूरिणा तेन क्रियते श्राद्धपद्धतिः ॥

End:— श्रुतिस्मृतिपुराणेभ्यो मया हेमाद्रिणोद्धृतम् ।
श्राद्धकल्पमिदं सम्यक् पितॄणां तुष्टिकारकम् ॥

Colophon.—

इति श्रीपण्डितहेमाद्रिविरचितः श्राद्धकल्पः समाप्तः ।

Post Colophon:—

शुभं भूयात् ।

Then in a different hand:—

इति हेमाद्रिश्राद्धकल्पपद्धतिः ।

1196.

6136. **कात्यायनश्राद्धकारिका ।** *Kātyāyana śrāddha-kārikā.*

Substance, country-made paper. 11¾×5 inches Folia, 5 Lines, 11 on a page. Extent in ślokās, 100. Character, modern Nāgara Appearance, fresh. Complete.

Beginning:—

कात्यायनो मुनीनाह यथाश्राद्धं तथा वदे ।
गयादौ श्राद्धं कुर्व्वीत संक्रान्त्यादौ विशेषतः ॥
काले वाऽपरपक्षे च चतुर्थ्यां उत्तरे च वा ।
संपाद्य + + + पूर्व्वेद्युश्च निमन्त्रयेत् ॥

Kārikās based on the Śrāddha-Pariśiṣṭa of Katyāyana

Colophon:—

इति श्राद्धकारिका समाप्ता ।

1197.

5970. **श्राद्धदीपिका ।** *Śraddha dīpikā.*

By Yājñika Kāśī Dīksita, son of Sadāśiva Dīksitā.

Substance, country-made paper 10¼ × 1 inches Folia, 73 Leaf 72 is missing Lines, 9 on a page Extent in ślokas, 1460 Appearance discoloured Complete

Śrāddha ceremony, as performed by the followers of the White Yajurveda. It is based on Kātyāyana Sūttra and the Karka Bhāsya.

See C S Vol. II, No 426.

Last Colophon :—

इति श्राद्धदीपिकायां संक्षिप्तनान्दीश्राद्धप्रयोगः ।

इति श्रीसदाशिवदीक्षितसुतकाशीदीक्षितकृता श्राद्धदीपिका समाप्त ।

1198.

6200. **पार्व्वणश्राद्धप्रयोगः ।** *Pārvana-śrāddha-prāyoga.*

Being an extract from Śrāddha-Bhāskara.

By Kāśī Dīkṣita, son of Sadāśiva Dikṣita

Substance, country-made paper 8 × 4¾ inches Folia, 29 Lines, 10 on a page Character, Nāgara of the early nineteenth century Appearance, old and discoloured

Beginning :—

श्रीगणेशाय नमः ।

अथ पार्व्वणश्राद्धप्रयोगः ।

तत्र यज्ञोपवीती विष्णुस्मरणपूर्व्वकं प्राणायामत्रयं कृत्वा प्राचीनावीती संकल्पवाक्यमुच्चारयेदिति हेमाद्रिः ।

27A, इति सदाशिवदीक्षितसुतकाशीदीक्षितकृते श्राद्धभास्करे पार्व्वण-श्राद्धप्रयोगः समाप्तः ।

28A, इति श्राद्धभास्करप्रयोगपार्व्वणश्राद्धसंकल्पः समाप्तः । अथ दर्भ-लक्षणमाह, अथ कूर्चलक्षणम्, ब्राह्मणाः, 28B, अथ यजमानः, अथ माह-लयनिर्णयः, 29B, अथ वैष्णवभोजनविधिः ।

1199.

6135 **कात्यायनसूत्रश्राद्धपद्धतिः ।** *Kātyāyana-sūtra-sraddha-paddhati.*

Substance, country-made paper 12×5 inches Folia, 5 Lines, 9 on a page Extent in slokas, 100 Character, Nāgara Appearance, new Complete

Beginning :—

श्री गणेशाय नमः ।

सूर्यं साम्बं गुरुञ्चैव नत्वा त्रिपुरसुन्दरी ।

कात्यायनस्य सूत्रस्य क्रियते श्राद्धपद्धतिः ॥

सूत्रानुसारिणी ह्येषा बालबोधप्रबोधिनी ।

ज्ञातव्या शास्त्रविद्भिः संक्षेपेण कृता तु या ॥

तत्रादौ सर्व्वप्रकृतिभूतं दर्शश्राद्धमारभते ।

Colophon :—

इति सूत्रोक्तश्राद्धप्रयोगपद्धतिः ।

This *Paddhati* closely follows Kātyāyana Śrāddha-Pariśiṣṭa-sūttra.

1200.

6230. **कातीयपार्व्वणश्राद्धसूत्रपरिशिष्टपद्धतिः ।**

Kātīya-pārvaṇa-srāddha-sūttra-pariśiṣṭa-paddhatiḥ.

Substance, country-made paper 11×5 inches Folia, 6 Lines, 10 on a page Extent in ślokās, 300. Character, modern Nāgara Date, Samvat 1930 Appearance, fresh Complete

Colophon :—

इति परिशिष्टसूत्रेषु पार्व्वणश्राद्धसूत्रपद्धतिः समाप्ता ।

Post Colophon :—

शुभं भवतु। बालमुकुन्दस्येदम्। संवत् १८३० फाल्गुन क्व० १ चन्द्रे काश्यां लिखितम्।

Beginning —

श्री अथातोऽपरपक्षादिषु पार्व्वणश्राद्धं व्याख्यास्यामः (Sūtra).

1201.

6207 **श्राद्धपद्धतिः।** *Śrāddha-paddhatiḥ*

By Ḍhoṅḍhū Miśra, son of Prāṇadhara

Substance country-made paper 10½ × 5 inches Folia, 46. Lines, 12 on a page Extent in ślokas, 2000. Character, Nāgara of the nineteenth century Appearance, fresh Complete Written in two different hands, the first writes up to 9A, the second continues to the end

Last Colophon.—

इति श्रीप्राणधरात्मज-श्रीढोंढूविरचितायां पद्धतौ यतिधर्म्मविधिः समाप्तः।

The Paddhati is for the followers of the White Yajurveda.

The mangalācarana and the object of the work :—

कर्क्कात्यायनकल्पवृत्तवचो विचार्य्याचरणं सताञ्च।
यजुर्विदां श्राद्धविधिं व्यधत्त ढोंढूबुधो बोधविबोधनाय॥
विविधाः पद्धतीर्बुद्ध्वा बह्वीं श्राद्धस्य पद्धतिम्।
माध्यन्दिनीयविधिना शोधयन्तु धिया बुधाः॥

अथ पार्व्वणश्राद्धक्रमसूचनम्।

1202

5763 **श्राद्धपद्धतिः।** *Śrāddha-paddhatiḥ.*

By Ḍhoṅhu (?) son of Prāṇadhara.

Substance, country made paper 11 × 4½ inches Folia, 89 Lines, 8 per page Extent in ślokas 2100 Character. Nāgara Date, Samvat 1940 Appearance, mouse-eaten Complete

Beginning :—

श्रीगणेशाय नमः ।
सकर्क्कात्यायनकल्पवृत्त-
वचो विचार्य्याचरणं सताञ्च ।
यजुर्विदां श्राद्धविधिं विधत्ते (तद्वृत्त)
दोङ्कं बुधोऽबोधविबोधनाय ॥
विविधाः पद्धतीर्बुद्ध्वा वद्धा श्राद्धस्य पद्धति[ः]
माध्यंदिनीयविधिवर्णं(?) शोधयन्तु धिया बुधाः ॥

अथ पार्व्वणश्राद्धस्मरणसूत्रं, etc , etc.

The author's name is variously spelt in different colophons

22B, इति श्रीमिश्रप्राणधरात्मजडोङ्कविरचितायां सांवत्सरैकोद्दिष्ट-कर्त्तव्यता समाप्ता; 29B, इति मिश्रश्रीप्राणधरात्मजडोंढूविरचिताऽशौचान्त-र्गतक्रियासमाप्ता: 34A, इति मिश्रश्रीप्राणधरात्मजडोंढविरचित एका-दशाहान्तर्गतवृषोत्सर्गविधिः समाप्तः; 36B, इति मिश्रश्रीप्राणधरात्मज-श्रीडोंढूविरचित एकादशाहश्राद्धविधिः समाप्तः; 44B, श्रीप्राणधरात्मज-डोंढूविरचिता सपिण्डीकरणेतिकर्त्तव्यता समाप्ता; 52A, इति मिश्रश्रीडोंढु-विरचिता तीर्थश्राद्धेतिकर्त्तव्यता समाप्ता; 53A, इति मिश्रडोंढूविरचित-नित्यश्राद्धेतिकर्त्तव्यता समाप्ता; 89B, इति मिश्रश्रीप्राणधरात्मजडोङ्कविर-चितायां पद्धतौ धर्म्मविधिः ।

Post Colophon Statement:—

शुभमस्तु श्रीसंवत् १६४० मी० भा० कृष्ण ५ ।

1203.

6124. **श्राद्धान्धभास्कर ।** *Śrāddhāndhabhāskara,*

By Viṣṇu Śarmā Agnihotri, son of Yajña Datta, (a disciple of) Ānubhūti svarūpa.

Substance, country-made paper 10×4¼ inches Folia, 30 Lines, 14 on a page Extent in ślokas, 900 Character, Nāgara. Appearance, old. Date, Samvat 1745 and Śaka 1610 Appearance, fresh Complete.

A manual for the performance of Śrāddha, of the school of Mādhyandina, based on the Bhāsya of Karka.

Colophon .—

इति श्रीपरमहंसपरिव्राजकाचार्य्य-श्रीमदनुभूतिस्वरूप दीक्षित-यज्ञदत्तात्मजाग्निहोत्रिविश्वनाथविरचिते श्राद्धान्धभास्करे प्रयोग-पद्धतिः।

Post Colophon Statement :—

शुभ भूयात्। १७४५। १६१०। ज्येष्ठ सुदि १ प्रतिपदा रवौ लिः ए' नाथन्हसिंहसुतमोहचातुर्वेदी वाराणसीस्थितः उत्तर-प्रदेशे कसहैग्रामे लिखित। शुभ + + +

Then we have the following —

विंशत्यंशे शनैश्चरः।

सैंहिकेयस्य विंशांशे परमोच्चो विगद्यते। ५७।

इति श्रीसर्व्वशास्त्रविशारद—श्रीकाशीनाथकृतौ लग्नचन्द्रिका सम्पूर्णा समाप्तम्। (?)

नीचस्थितो जन्मनि यो ग्रहः स्यात् तद्राशिना + + + +।
भवेत्त्रिकोणी यदि वा च केन्द्रे राजा भवेद्धार्म्मिकचक्रवर्त्ती॥

१७४५। ज्येष्ठ सु० १५ + + + + + १६१०। लिः भट्ट नाथ।

The beginning of the work :—

साध्यसाधनयोगेषु साधके च निजेच्छया।
अन्तर्यामितया तिष्ठन् फलदोऽस्तु सतां हरिः॥

अथ पार्व्वणश्राद्धप्रयोगः।

ततः श्वः श्राद्धमिति निश्चित्य पूर्व्वद्युर्वस्त्रक्षालनस्नानोपलेपन-भूमिकरणं च विधाय द्विजान् निमन्त्रयीत।

End — इतिकर्त्तव्यतामन्त्रकर्कभाष्यानुसारिणी।
श्री माध्यंदिनशाखीयैर्ज्ञातां विश्वनोद्धता॥

श्राद्धरत्नानि हि मया श्राद्धरत्नमहोदधेः ।
संगृह्याचापि नद्धानि रज्यतां हृदये सताम् ॥

See Ulwar Extract No 359, where the work is called :—

श्राद्धाङ्गभास्कर (?)

1203A.

6194, **मात्रादिश्राद्धनिर्णयः** *Mātrādi-śrāddha-nirṇayaḥ.*

(कात्यायनीयः) ।

Substance, country-made paper 10×4¼ inches. Folia, 24 Lines, 7 per page. Extent, in ślokas 300 Character, Nāgara of the nineteenth century. Appearance, fresh. Complete

Beginning :—

श्रीगणेशाय नमः पितृभ्यो नमः ।
त्रयीसुसंविर्त्तिविवेकनिर्म्मलाः
समग्रनिःश्रेयससिद्धिहेतवः ।
समस्तशास्त्रार्थं ससत्त्वबोधकाः
जयन्ति कात्यायनपादपांशवः ॥
ये नाम केचिदिह नः, etc , etc

The object of the work

केचिदज्ञानतो नष्टाः केचिन्नष्टाः प्रमादतः ।
केचिद् ज्ञानावलेपेन केचिन्नष्टैश्च नाशिताः ॥
गतानुगतिको लोको न लोकस्तत्त्वचिन्तकाः । (?)
अहो जनस्य मूर्खत्वात् हरितं ताम्रभाजनम् ।
पितॄन् प्रणम्य जनकान् तथा मातामहानपि ।
क्रियते संशयच्छित्त्यै मात्रादिश्राद्धनिर्णयः ॥

The end of the work.

निरीक्ष्य धर्म्मशास्त्राणि निबन्धांश्चापि नैकशः ।
उचितः + + श्चायं मात्रादिश्राद्धनिर्णयः ॥
चेतः प्रसन्नजननं विष्णुनामानन्दि सर्व्वरसयुक्तमिति प्रसन्नं ।
शास्त्रं खलु ... ...

Thus it ends abruptly

1204.

10308 पार्व्वणदर्श(र्भ)वटुश्राद्धप्रयोग ।

Pārvaṇa-darbha-vaṭu-śrāddha-prayogaḥ.

According to the rules of Kātyāyana.

By Devabhadra, son of Balabhadra Pāṭhaka

Substance country-made paper 8½×4 inches Folia, 16 Lines, 8 on a page Extent in ślokas, 250 Character, Nāgara of the eighteenth century Appearance, fresh Complete

Colophon :—

इति श्रीमत्पाठकबलभद्रात्मजदेवभद्रकृतपार्व्वणदर्शवटुश्राद्धप्रयोग सम्पूर्णं समाप्तम् ।

Post Col. :—

श्रीविष्णवे गदाधराय नमः ॥

Beginning .—

श्री गणेशाय नमः ॥

नत्वा गदाधरं पितॄन् कातीयसूत्रसम्मतः ।

वटुश्राद्धप्रयोगोऽयं तन्यते बालहेतवे ॥

2A, श्राद्धपाकात् देवनैवेद्यं स्वयं दक्षिणामुखः पञ्चसप्तनवभिरनियतैर्वा कुशैः देववत्सार्द्धद्विवेष्टनेन ॐकारेण कृतौ देवे कुशाग्रभागप्रमुखौ द्वौ वटू(टु) एवं पितृवत् कृतौ पित्र उदङ्मुखौ द्वौ प्रार्थना भवद्भिरस्मत्सपत्नीकपित्रादित्रयश्राद्धे ब्राह्मणकार्य्यमद्य सम्पाद्यं नः प्रसीदत सम्पादयिष्यामः ॥

1205.

5765. श्राद्धविधिः । *Śrāddha-vidhi.*

By Rāmāgnihotri

Substance, country-made paper 12×5 inches Folia, 1 to 9 and 1 to 22, 31 in all Lines, 8, 9 on a page Extent in ślokas, 700. Character, Nāgara by a modern hand Appearance, fresh.

There is nothing to show that the work is complete in the present manuscript

In spite of two different paginations, there is no break in the matter.

Beginning :—

ॐ तं मुनिवरमभिवन्दे यस्य प्रसादप्रयोग्या क्रतुवृन्दाः ।
फलन्ति सततं याज्ञिकाना चिदिवोद्भवान्यनेकफलानि ॥
कौलाच्छको नाम मुनिस्तपोनिधि—
स्तदन्वये वेदविचारदक्षः ।
अभूद्द्विजार्य्यो बलभद्रनामा ।
तदङ्गजो याज्ञिकचक्रपाणिः ॥ १ ॥
श्रीमान् याज्ञिकचक्रपाणितनयो वेदान्तवित् श्रोत्रियः ।
श्रौतस्मार्त्तविधानकृत् हरिपरः श्रीमाननेशाभिधः
तत्पुत्रः श्रुतिसागरैकतरणो दक्षः सुविद्वान् शुचिः
श्रीमान् शार्ङ्गधराभिधस्तु गिरिजानाथाङ्घ्रियुग्मे रतः ॥
तत्पुत्रोऽप्यभवत् श्रुतिश्चचतुरो रामाभिधोत्री सदा
भूदेवाङ्घ्रिषु पूजनेषु सततं युक्तैकधीः सर्व्वदा ।
कुर्व्वे श्राद्धविधिञ्च पार्व्वणविधिज्ञानार्थकार्य्यान्तये
सूत्रस्योपरि संशयौघतिमिरध्वंसाय सूर्य्यो महान् ॥
श्रुतिसूत्रोदितं सर्व्वं दृष्टमेवात्र दर्शितं ।
नोक्तं किञ्चित् स्वमत्यातो ग्राह्येयं मत्कृतिर्बुधैः ॥
अतः प्रथमं प्रकृतित्वात् पार्व्वणश्राद्धं अभिधास्ये ॥

It follows the Kātyāyana sūttra.

1206.

5877. **वृषोत्सर्गप्रयोग** । *Vṛṣotsarga-prayoga.*

By Anantadeva, son of Nāgadeva Bhaṭṭa.

Substance, country-made paper. 9½×4¼ inches Folia, 27. Lines, 7 on a page Extent in ślokas, 378. Character, Nāgara Date, Samvat 1893 Appearance, fresh Complete

This belongs to the White Yajurveda

Beginning :—

श्रीगणेशाय नमः ।

अथ नीलवृषोत्सर्गः ।

तत्र वृषलक्षणम् ।

जीववत्सायाः पयस्विन्याः पुत्रं त्रिहायनं द्विहायनं एकहायनं नीलं, बभ्रुं, कपिल, पिङ्गलं, कृष्णं लोहितं श्वेतं वैकवर्णं अनेकवर्णं वा अव्यङ्गाङ्गं..... ।

Colophon :—

इति श्रीमद्विद्वन्मुकुटमणि-प्रथमशाखि-श्रीमन्नागदेवभट्टसूनुना अनन्तभट्टेन कृतो वृषोत्सर्गप्रयोगः ।

Post Colophon —

संवत् १८९३ आषाढ़शुक्ल २ भृगुवासरे ।

1207.

6130 **अन्त्येष्टिपद्धति ।** *Antyesti-paddhati*

By Gadādhara Dīkṣita

Substance, country-made paper 9×7¼ inches Folia, 51 Lines, 8 on a page Extent in ślokas, 1000 Character, Nāgara Date, Samvat 1929 Appearance, fresh. Complete

The work was written in Śaka 1709; for the Brāhmaṇas professing the Mādhyandina Śākhā

Beginning .—

श्रीगणेशाय नमः । अविघ्नमस्तु ।

नत्वा गुरून् गणपतिं वासुदेवादिसम्मतां ।

श्रीगदाधरधौरेया तन्यतेऽन्त्येष्टिपद्धतिः ॥

तत्रासन्नमरणं पित्रादिकं पुत्रास्तीर्थं नीत्वा प्रायश्चित्तं कारयेत् ॥ (?)

End :— चिन्तामणिसुतो नाम्ना काशीवासी गदाधरः ।

व्यधत्त ग्रन्थानालोक्य रुचिरामन्त्यपद्धतिम् ।

माध्यन्दिनीयशाखायामौर्द्ध्वदेहिककर्म्मभिः ।

कात्यायनोक्तमार्गेण सन्ति पद्धतयः शतम् ॥
ताभ्यस्त्वस्या विशेषोऽयं पण्डितैः सोऽवधार्य्यताम् ॥

Colophon —

इति श्रीचिन्तामणिसूनुना दीक्षितगदाधरेण रचितान्त्येष्टि-
पद्धतिर्म्मरणविधानानि च समाप्तानि ।

Date :— ग्रहाभ्रऋषिभूसंख्ये (१७०९) वत्सरे मासि फाल्गुने ।
गङ्गायामलिखद् ग्रामनगरस्थो गदाधरः ॥

Post Col. :—

शिवनारायणसुतो नाम्ना काशीनिवासिनः ।
श्रावणे मासि सिते पक्षे पञ्चम्यां भृगुवासरे ।
बालमुकुन्देन लिखितमन्त्येष्टिपद्धतिं शुभाम् ।
संवत् १९२९ ।

1208.

6203 लक्षहोमपद्धति । *Lakṣa-homa-paddhatiḥ*

By Kāśī Dīkṣita, son of Sadāśiva Dīkṣita.

Substance, country-made paper 10×4½ inches Folia, 34 Lines, 11 on a page Extent in ślokās, 900 The 8th and 9th leaves newly restored Character, Nāgara of the nineteenth century Appearance, old and discoloured Complete

Colophon :—

इति लक्षहोमपद्धतिः समाप्ता ॥
इति श्रीयाज्ञिकसदाशिवदीक्षितसुतकाशीदीक्षितकृता लक्ष-
होमपद्धतिः समाप्ता ॥
शुभमस्तु ॥

Beginning —

अथ लक्षहोमपद्धतिः ॥
तत्र तावन्नानादेवतोद्देशेन वक्ष्यमाणनानामंत्रैः सर्व्वपापक्षयार्थं
परमसुखशान्त्यर्थं क्रियमाणस्त्वेकः ॥

3B, इति लक्षहोमविधिः अथ लक्षहोमप्रयोगः ।

4A, अमुककामो लक्षहोमेनाहं यक्ष्ये, इति संकल्प्य तदंगत्वेन गणेशपूजन-पुण्याहवाचन-मातृकापूजन-नांदीश्राद्धाचार्य्यवरणादीनि करिष्ये इति संकल्प्य गणेशं पूजयेत् ।

1209.

6221

Substance country-made paper 12×5 inches Folia 6 Lines, 8 on a page Character modern Nāgara Appearance, fresh

It relates to the purifying rite for a child born under the evil star of Mūlā and follows the precept of Deva and Karka

Beginning :—

अथ मूलविधानपद्धति लिख्यते ।

तत्र प्रसवमूलनक्षत्राद्द्वितीयमूलनक्षत्रे सुस्नातः सपत्नीको यजमानः .. ..

मम जातस्य कुमारस्य कुमार्य्या वा मूलप्रथमचरणादिजनन-सूचितपित्राद्यरिष्टशांतिद्वारा श्रीपरमेश्वरप्रीतये सग्रहमखं मूल-विधानमहं करिष्ये ।

The last leaf (the 6th) is not connected with the 5th which breaks off abruptly, and it contains no leaf mark. It ends with the colophon :—

इति श्रीगोपीनाथदीक्षितेन कामदेवकृतप्रपद्धत्युक्तमूलविधान-कंडिका संक्षिप्तसरणी कृता ॥

Post Colophon —

भाद्रकृ० तृतीया गुरुवासरे समाप्तिः ॥ शांतिः ॥

The beginning quoted above does not appear to be the beginning of the Saraṇī, but probably of a part of Kāmadeva's work itself, which is entitled Karma-pradīpikā or Pāraskara-gṛhya-sūttra-paddhati. See W. p 65

1210.

6222 (कात्यायनपरिशिष्टोक्त) मूलशान्तिप्रयोगः।

Mūla-śānti prayoga.

Substance, country-made paper 12×5 inches Folia, 10 Lines, 10 on a page Extent in slokas, 200 Character Nāgara Date, Samvat 1937 Appearance, fresh Complete

Colophon :—

इति कात्यायनपरिशिष्टोक्तमूलशान्तिप्रयोगः समाप्तः।

Post Colophon :—

शुभमस्तु सं० कार्त्तिकवदि १२ वार शनि संमत् १९३७।

Beginning :—

श्री गणेशाय नमः।

अथ कात्यायनपरिशिष्टोक्तमूलशान्तिविधानम्। अथातो मूलजातस्य विधिं व्याख्यास्यामो मूलांशे प्रथमे पितुर्नेष्टो द्वितीये मातुः तृतीये धनधान्यस्य चतुर्थे कुलशोकावहः। स्वयं पुण्यभागी स्यात्। मूलनक्षत्रे मूलविधानं कुर्य्यात्॥

End — सार्पदैवते एष एव विधिः कात्यायनोक्तः कृतः। शान्तिर्भवति शान्तिर्भवतीति कर्मशेषं समापयेत्॥

1211.

6224 विनायकशान्तिः। *Vināyaka-śāntiḥ*

(*Mādhyandina*)

Substance, country-made paper 12×5 inches Folia, 11. Lines, 8 on a page. Extent in slokas 180 Character, Nāgara Date, Samvat 1918 Appearance, fresh Complete

Colophon :—

इति विनायकशान्तिप्रयोगः।

Post Colophon :—

श्रीगजाननार्पितमस्तु उत्तरे कर्म्मणि निर्व्विघ्नमस्तु॥

यज्ञहोममन्त्राः take up 12 lines after which we have the date —

संवत् १९१८ चैत्र कृष्ण ६ ।

The following is added by a later hand —

स १९३४ आ० कृ० ९ बालमुकुन्दस्येदम् ।

Beginning —

श्री गणेशाय नमः ।

ॐ अथ सर्व्वकर्माङ्गभूतं विनायकशान्तिविधानम् । तस्यानिष्ट-निवृत्तिफलकत्वेन काम्यत्वेऽपि ।

एवं विनायकं पूज्य ग्रहांश्चैव विधानतः ।

कर्मणां फलमाप्नोतीति याज्ञवल्क्योक्तेन सर्व्वकर्माङ्गत्वोक्तेः ।

याज्ञवल्क्यः ।

विनायकः कर्मविघ्नसिद्ध्यर्थं विनियोजितः ।

गणानामाधिपत्ये च रुद्रेण ब्रह्मणा तथा ॥

इयं शान्तिः पुण्यार्थं श्रीप्राप्त्यर्थं सर्व्वकामसिद्ध्यर्थ वा क्रियते ॥

1212.

6299. **कूपप्रतिष्ठाविधिः ।** *Kūpa-pratiṣṭhā-vidhiḥ*

By Gaṇēśa—as directed by Kātyāyana.

Substance, country-made paper 7×5 inches Folia, 3 Lines, 11 on a page Extent in Ślokās, 40 Character, modern Nāgara Copied in Samvat 1946 Appearance, fresh Complete

Colophon :—

इति श्री [मालव—added by a recent hand] दीक्षित-गणेशकृतकातीयोक्तसंक्षिप्तकूपप्रतिष्ठाविधिः ।

Post Colophon —

सं १९४६ ।

Beginning :—

श्री गणेशाय नमः।

कातीयोक्ता कूपादिप्रतिष्ठा।

तत्र मुहूर्त्ते भूम्यादिपूजनं कृत्वा कूपं खातयेत्।

